CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.
Coll. No. 584

Title Tātparyabodhinī

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 584 Subject : Vedānta.

Title : Tātparyabodhinī

Author : Vidyāraṇyamuni Scribe : —

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. : —

Size : 11.8" by 4.9" Extent : 56 foll.

Language : Sanskrit. Script : Devanāgarī

Remarks :

चि. दी.
१

॥श्रीगणेशाय नमः॥ शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजं॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नो
पशांतये॥१॥ यस्य स्मरणमात्रेण विघ्नाहरं प्रयांति हि॥ वंदे हं हंतिवक्रं तं वांछितार्थप्रदा
यकं॥२॥ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ क्रियते चित्रदीपस्य व्याख्या तात्पर्यबोधिनी॥३॥ चि
कीर्षितस्य ग्रंथस्य निष्प्रत्यूहपरिपूरणाय परमात्मनीति पदेनेष्टदेवतातत्त्वानुसंधानलक्षणं मंगलमा

यथा चित्रपटे दृष्टमवस्थानां चतुष्टयं॥ परमात्मनि विज्ञेयं तथावस्थाचतुष्टयं॥१॥ व॥

चरन्नस्य ग्रंथस्य वेदांतप्रकरणत्वात्तदीयैरेव विषयादिभिस्तद्वत्तासिद्धिं मनसि निधायाध्यारोपापवा
दाभ्यां निष्प्रपंच्यत इति न्यायमनुसरन्परमात्मन्यारोपितस्य जगतः स्थितिप्रकारं सदृष्टांतं प्रतिजानी
ते॥ यथेति॥ चित्रपटे यथा वक्ष्यमाणानामवस्थानां चतुष्टयं तथा एवं परमात्मन्यपि वक्ष्यमाणमवस्थाच १

तुष्टयं विज्ञेयमिति॥१॥ किं तदित्याकांक्षायां दृष्टांतदार्ष्टांतिकयोरप्यवस्थाचतुष्टयं क्रमेणोद्दिशति॥ यथे
ति॥ धौतो घट्टितो लांछितो रंजितश्चेत्येवं प्रकाराश्चत्वारोवस्था यथा चित्रपटे उपलभ्यंते तथा परमात्मन्य
पि चिदंतर्यामी सूत्रात्मा विराट् चेत्यवस्थाचतुष्टयं बोद्धव्यमित्यर्थः॥१॥ तत्र दृष्टांतस्थितानामवस्थानां स्व

यथा धौतो घट्टितश्च लांछितो रंजितः पटः॥ चिदंतर्यामी सूत्रात्मा विराट् चात्मा तथेर्यते॥२॥
स्वतः शुभ्रोऽत्र धौतः स्याद्घट्टितोन्नविलेपनात्॥ मष्याकारैर्लांछितः स्याद्रंजितो वर्णपूरणात्॥३॥

रूपं क्रमेण व्याख्याति॥ स्वत इति॥ अत्र आस्ववस्थासु मध्ये स्वतो द्रव्यांतरसंबंधं विना शुभ्रो धौत इ
त्युच्यते॥ अन्नेन लिप्तो घट्टितः मषीमयैराकारैर्युक्तो लांछितः यथायोग्यैर्वर्णैः पूरितो रंजितः स्यात्
॥३॥

चित्रदी॰
२

दार्ष्टीतिकेनानुसारयति। स्वत इति। परः परमात्मा मायातत्कार्यरहितश्चिदित्युच्यते मायायोगादन्तर्या-
मी॥ अपंचीकृतभूतकार्यसमष्टिसूक्ष्मशरीरयोगात्सूत्रात्मा। पंचीकृतभूतकार्यसमष्टिस्थूलशरीरो-
पाधियोगाद्विराडिति॥४॥ ननु परमात्मनश्चित्रपटस्थानीयत्वेन दर्शितानि चित्राणि वक्तव्यानीत्यत आ-

स्वतश्चिदंतर्यामी तु मायावी सूक्ष्मसृष्टितः॥ सूत्रात्मा स्थूलसृष्ट्यैव विराडित्युच्यते परः॥४॥
ब्रह्माद्याः स्तंबपर्य्यंताः प्राणिनोऽत्र जडा अपि॥ उत्तमाधमभावेन वर्त्तंते पटचित्रवत्॥५॥

ह॥ ब्रह्माद्या इति। अत्र परमात्मनि उत्तमाधमभावेन वर्त्तमानं ब्रह्मादिस्तंबपर्य्यंतं चेतनात्म-
कं गिरिनद्यादि जडजातं च चित्रस्थानीयमित्यर्थः॥५॥ ब्रह्मादिजगतश्चैतनस्थानीयत्वे कारणं वक्तुं २

दृष्टांतमाह। चित्रेति। यथा चित्रे लिखितानां मनुष्यादिशरीराणामेव नानावर्णोपेता वस्त्रविशेषा लिख्यंते
ते। ते च शीताद्यनिवारकत्वाद्वस्त्राभासा एव॥६॥ दार्ष्टांतिकमाह। पृथगिति। एवं परमात्मन्यारोपितानां

चित्रार्पितमनुष्याणां वस्त्राभासाः पृथक्पृथक्॥ चित्राधारेण वस्त्रेण सदृशा इव कल्पिताः
॥६॥ पृथक्पृथक्चिदाभासाश्चैतन्याध्यस्तदेहिनां॥ कल्प्यंते जीवनामानो बहुधा संसरंत्यमी
॥७॥

देवादीनां शरीराणामेव जीवनामानश्चिदाभासाः प्रत्येकं कल्प्यंते न पर्वतादीनां। तेषां कल्पने कारणमाह॥
बहुधेति॥ अमी जीवा देवतिर्यङ्मनुष्यादिशरीरद्वारा बहुधा संसरंति न परमात्मा तस्य निर्विकार-
त्वादित्यभिप्रायः॥७॥ व

ननु सर्वे वादिनो लौकिकाश्चात्मन एव संसार इति विवदंति॥ न च किं कारणमित्याशंक्याज्ञानमेव कार
णमिति सदृष्टांतमाह॥ वस्त्राभासेति॥८॥ गिरिनद्यादीनां तु चिदाभासकल्पनाभावे दृष्टांतपुरःसरमा

वस्त्राभासस्थितान्वर्णान्यद्वदाधारवस्त्रगान्॥ वदंत्यज्ञास्तथा जीवसंसारं चिद्गतं विदुः॥८॥
चित्रस्थपर्वतादीनां वस्त्राभासो न लिख्यते॥ सृष्टिस्थमृत्तिकादीनां चिदाभासस्तथा न हि॥९॥
संसारः परमार्थोऽयं संलग्नः स्वात्मवस्तुनि॥ इति भ्रांतिरविद्या स्याद्विद्ययैषा निवर्त्तते॥१०॥
आत्माभासस्य जीवस्य संसारो नात्मवस्तुनः॥ इति बोधो भवेद्विद्या लभ्यतेऽसौ विचारणात्॥११

हा॥ चित्रस्थेति प्रयोजनाभावादिति भावः॥९॥ एवमात्मन्यारोपितस्य संसारस्याज्ञाननिवर्त्यत्वसिद्धये त
न्मूलभूतामविद्यामाह॥ संसार इति॥१०॥ केयं विद्या तस्याश्चोपायश्च क इत्याकांक्षायां विद्यास्वरूपं तस्या ३

श्चोपायं च दर्शयति॥ आत्माभासस्येति चिदाभासस्येत्यर्थः॥११॥ विचाराल्लभ्यते विद्येत्युक्तं॥ कस्य विचाराल्ल
भ्यते विद्येत्याशंक्याह॥ सदेति॥ ननु परमात्मा विचार्यतां मोक्षावस्थायां फलरूपेणावस्थानात् जीवजगतोर्वि
चारः कोपयुज्यत इत्याशंक्य तयोरपबाधनेन परमात्मावशेषार्थं उपयुज्यत इत्याह॥ जीवभावेति॥१२॥ ननु

सदा विचारयेत्तस्माज्जगज्जीवपरात्मनः॥ जीवभावजगद्भाववाधे स्वात्मैव शिष्यते॥१२॥
नाप्रतीतिस्तयोर्बाधः किंतु मिथ्यात्वनिश्चयः॥ नो चेत्सुषुप्तिमूर्छादौ मुच्येतायत्नतो जनः
॥१३॥

विचारेण जीवजगतोर्बाधे तदप्रतीत्या व्यवहारलोपः प्रसज्येतेत्याशंक्य बाधशब्दस्य विवक्षितमर्थं
विपक्षे दंडं चाह॥ नाप्रतीतिरिति॥ सुषुप्तिमूर्छादौ स्वत एव द्वैतप्रतीत्यभावात्तत्त्वज्ञानं विनापि मुक्तिः
स्यादित्यर्थः॥१३॥

चित्रदी. ४ स्वात्मैवशिष्यतइत्यनेनापिपरमात्मनःसत्यत्वज्ञानमेवविवक्ष्यते।नतद्व्यतिरिक्तजगद्विस्मृतिर्जीवन्मु-
क्त्यभावप्रसंगादित्याह।परमात्मेति॥१४॥नन्वाविचारयेदित्युक्त्यादेहपातपर्यंतंविचारप्रसक्तौसमाप्त्यन

परमात्मावशेषोपितत्सत्यत्वविनिश्चयः॥नजगद्विस्मृतिर्नोचेज्जीवन्मुक्तिर्नसंभवेत्॥१४॥
परोक्षाचापरोक्षेतिविद्याद्वेधाविचारजा॥तत्रापरोक्षविद्याप्तौविचारोयंसमाप्यते॥१५॥अ-
स्तिब्रह्मेतिचेद्वेदपरोक्षज्ञानमेवतत्॥अहंब्रह्मेतिचेद्वेदसाक्षात्कारःसउच्यते॥१६॥ ७॥

स्यावधिमाह।परोक्षाचापरोक्षेति।विचारजन्याविद्यापरोक्षत्वापरोक्षत्वभेदेनद्विविधेत्यर्थः॥१५॥त-
योरुभयोःस्वरूपंक्रमेणदर्शयति।अस्तिब्रह्मेतिचेदिति॥१६॥ ७ ॥ ॥ ४

एवंविधसाक्षात्कारासाधारणकारणमात्मतत्त्वविवेचनंप्रतिजानितेतदितियेनसाक्षात्कारेणपुमान्स-
द्यएवविमुच्यतेतत्साक्षात्कारसिद्ध्यर्थमितिपूर्वेणान्वयः॥१७॥चिदात्मनःपारमार्थिकमेकत्वंनिश्चेतुंव्य-

तत्साक्षात्कारसिद्ध्यर्थमात्मतत्त्वंविविच्यते॥येनायंसर्वसंसारात्सद्यएवविमुच्यते॥१७॥
कूटस्थोब्रह्मजीवेशावित्येवंचिच्चतुर्विधा॥घटाकाशमहाकाशौजलाकाशाभ्रखेयथा॥१८॥

वहारदशायांप्रतीयमानंचैतन्यभेदमुद्दिशति।कूटस्थइति।एकस्याश्चितेःचातुर्विध्येदृष्टान्तमाह
घटाकाशेति॥१८॥

घटावच्छिन्नस्य घटाकाशस्य तदनवच्छिन्नस्य च महाकाशस्य प्रसिद्धत्वात्तौ विहायाप्रसिद्धं जलाकाशं व्युत्पा-
दयति। घटावच्छिन्नेति। घटावच्छिन्ने आकाशे यदुदकमस्ति तत्र जले प्रतिबिंबितोऽभ्रनक्षत्रसहि-

घटावच्छिन्नखे नीरं यत्तत्र प्रतिबिंबितः॥ साभ्रनक्षत्र आकाशो जलाकाश उदीर्यते॥१९॥
महाकाशस्य मध्ये यन्मेघमंडलमीक्ष्यते॥ प्रतिबिंबतया तत्र मेघाकाशो जले स्थितः॥२०॥

तश्चाकाशो जलाकाश इत्युच्यते॥१९॥ अभ्राकाशं व्युत्पादयति। महाकाशस्येति। तत्र मेघमंडले यज्ज-
लं तस्मिन्नित्यर्थः॥२०

ननु मेघजलस्याप्रतीयमानत्वात्तत्र नभसस्तत्र कथं प्रतिबिंबितत्वज्ञानमित्याशंक्याह। मेघांशेति। मेघरूपस्य जल-
स्य प्रत्यक्षेणानुपलंभेऽपि वृष्टिलक्षणकार्येण मेघे तदुपादानमुदकं सूक्ष्मावयवरूपमस्तीत्यनुमीयत उ-
दकत्वेनैव लिंगेन। विमतं जलमाकाशप्रतिबिंबवद्भवितुमर्हति जलत्वात् घटगतजलवदित्यनुमाने-

मेघांशरूपमुदकं तुषाराकारसंस्थितं॥ तत्र खप्रतिबिंबोऽयं नीरत्वादनुमीयते॥२१॥ अ-
धिष्ठानतया देहद्वयावच्छिन्नचेतनः॥ कूटवन्निर्विकारेण स्थितः कूटस्थ उच्यते॥२२॥

न मेघांशरूपे जलेऽप्याकाशप्रतिबिंबसद्भावोऽवगम्यत इत्यर्थः॥२१॥ एवं दृष्टांतभूतमाकाशचतुष्टयं
व्युत्पाद्य दार्ष्टांतिके प्रथमोद्दिष्टं कूटस्थं व्युत्पादयति॥ अधिष्ठानेति। पंचीकृतापंचीकृतभूतकार्यत्वेन
स्थूलसूक्ष्मरूपस्य देहद्वयस्याविद्याकल्पितस्याधारतया वर्तमानत्वेन ताभ्यामवच्छिन्न आत्मा कूट-

चित्रदी॰ ६

स्य इत्युच्यते॥ तत्र कूटस्थस्य शरीरद्वयवृत्तौ निमित्तमाह। कूटवदिति॥२१॥ एवं कूटस्थं व्युत्पाद्य जीवस्य कूट
स्थे कल्पितबुद्धिप्रतिबिंबत्वेन तत्स्वरूपानित्वात्तं व्युत्पादयति। कूटस्थ इति॥ तस्य जीवशब्दाभिधेय
त्वे निमित्तमाह॥ प्राणानामिति। कूटस्थातिरिक्तजीवकल्पनप्रयोजनमित्याशंक्याविकारिणः कूट

कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिंबकः॥ प्राणानां धारणाज्जीवः संसारेण स युज्यते॥२३॥
जलव्योम्ना घटाकाशो यथा सर्वस्तिरोहितः॥ तथा जीवेन कूटस्थः सोऽन्योन्याध्यास उच्यते॥२४॥

स्थस्य संसारासंभवात्तन्निर्वाहार्थं सोऽङ्गीकर्तव्य इत्याह॥ संसारेणेति॥२३॥ ननु जीवातिरिक्तः कूटस्थो
स्ति चेत्किमिति न प्रतिभासत इत्याशंक्य जीवेन तिरोहितत्वादिति सदृष्टांतमाह॥ जलेति। नन्वेतत्तिरो
धानं न क्वापि शास्त्रे प्रतिपादितमित्याशंक्य तस्यान्योन्याध्यासशब्देनाभिधानान्मैवमित्याह। सोऽन्यो ६
न्याध्यास इति। उच्यते भाष्यादिष्विति शेषः॥२४

नन्वयमेवाध्यासः सर्वस्य कारणरूपाऽविद्या वक्तव्येत्याशंक्य जीवकूटस्थयोः संसारदशायां भेदाप्र
तीतिरेवाविद्येत्याह॥ अयमिति॥२५॥ पूर्वोक्तस्य जीवस्याविद्याकल्पितत्वसंगीकरणायाविद्यां वि
भजते विक्षेपेति॥ आवरणं द्विविधं असत्वापादकं अभानापादकं चेति विक्षेपहेतुत्वेनाभ्यर्हितत्वा

अयं जीवो न कूटस्थं विविनक्ति कदाचन॥ अनादिरविवेकोऽयं मूलाविद्येति गम्यतां॥२५॥
विक्षेपावृतिरूपाभ्यां द्विधाविद्या व्यवस्थिता॥ न भाति नास्ति कूटस्थ इत्यापादनमावृतिः॥ २६

दावृतिं प्रथमं लक्षयति। न भातीति। कूटस्थो न भाति न प्रकाशते नास्ति चेति व्यवहारहेतुरावरण
मित्यर्थः॥२६॥ नन्वविद्यायास्तत्कृतावरणस्य च सद्भावे किं प्रमाणमित्याशंक्य लोकानुभव एवेत्या
ह॥ ॥

अज्ञानीति॥ विदुषा कूटस्थं किं जानासीति पृष्टोऽज्ञानी तेन जानामीत्यज्ञानमनुभूय वक्ति। अयमविद्या
नुभवः। न केवलमज्ञानानुभवमेव वक्ति। अपि तु नास्ति न भाति कूटस्थ इति कूटस्याभावाभानेवानु
भूय वदति। अयमावरणानुभवः। अत उभयत्रानुभवः प्रमाणमिति भावः॥२७॥ ननु भवन्मते आ

अज्ञानी विदुषा पृष्टः कूटस्थं न प्रबुध्यते॥ न भाति नास्ति कूटस्थ इति बुद्ध्वा वदत्यपि॥२७॥
स्वप्रकाशे कुतोऽविद्या तां विना कथमावृतिः॥ इत्यादितर्कजालानि स्वानुभूतिर्ग्रसत्यसौ॥२८॥

त्मनः स्वप्रकाशत्वात्तस्मिन्नविद्या नोपपद्यते तेजस्तिमिरयोरिव विरुद्धस्वभावत्वेन तयोः संबंधानु
पपत्तेरविद्याऽभावे च तत्कृतमावरणं दुर्निरूपं स्यात्तदभावे च तन्मूलकस्य विक्षेपस्यासंभवः विक्षे
पाभावे च ज्ञाननिवर्त्यस्यानर्थस्याभावात् ज्ञान॥

वैयर्थ्यं ततस्तत्प्रतिपादकं शास्त्रमप्रमाणं स्यादित्याशंक्य सर्वं पूर्वोक्तानुभवबाधितमित्याह। स्वप्र
काश इति। न हि दृष्टेऽनुपपन्नं नामेति न्यायादिति भावः॥२८॥ नन्वनुभवस्योक्ततर्कविरोधेनाभासत्वा

स्वानुभूतावविश्वासे तर्कस्याप्यनवस्थितेः॥ कथं वा तार्किकंमन्यस्तत्त्वनिश्चयमाप्नुयात्
२९

त्तेन तत्त्वनिश्चयः स्यादित्याशंक्यानुभवप्रमाण्यानभ्युपगमे केवलतर्कस्यानिश्चायकत्वस्य स्वेनैवाभ्यु
पगतत्वात्तार्किकस्य तत्त्वनिश्चयः क्वापि स्यादित्याह॥ स्वानुभूताविति॥२९॥

नन्वनुभव एव तत्त्वनिश्चायक एव तथाप्यनुभूयमानस्यार्थस्य संभावितत्वज्ञानाय तर्कोऽप्यपेक्ष्यत इत्याशंक्यानूद्य तर्कस्यानुभवानुसारेणैव तर्को वर्णनीयो न तद्विरोधेनेत्याह॥ बुद्ध्यारोहायेति॥३०॥ कोऽ

बुद्ध्यारोहाय तर्कश्चेदपेक्ष्येत तथा सति॥ स्वानुभूत्यनुसारेण तर्क्यतां मा कुतर्क्यताम्॥३०॥
स्वानुभूतिरविद्यायामावृतौ च प्रदर्शिता॥ अतः कूटस्थचैतन्यमविरोधीति तर्क्यताम्॥३१॥
तच्चेद्विरोधि केनेयमावृतिर्ह्यनुभूयताम्॥

सावनुभवो यदनुसारेण तर्को वर्णनीय इत्याकांक्षायां पूर्वोक्तमविद्यादिगोचरमनुभवं स्मारयति। स्वानुभूतिरिति। फलितमाह। अत इति॥३१॥ तमेव तर्कमभिनीय दर्शयति। तच्चेदिति। अविद्यावरणसाधकचैतन्यस्यैव तद्विरोधित्वे अविद्याप्रतीतिरेव न स्यादिति भावः॥

तर्ह्यविद्यायाः को विरोधी स्यादत आह। विवेक इति। विवेक उपनिषद्विचारजन्यं ज्ञानं विवेकस्याविद्याविरोधित्वं दृष्टमित्यत आह। तत्त्वज्ञानिनीति॥३२॥ एवमविद्यावरणं दर्शयित्वा विक्षेपाध्यासमाह। अविद्येति। पूर्वोक्ताविद्यावरणवति कूटस्थे यत्स्वगात्मन्यारोपितस्थूलसूक्ष्मशरीरसहितं चिदाभा

विवेकस्तु विरोध्यस्यास्तत्त्वज्ञानिनि दृश्यताम्॥३२॥ अविद्यावृतकूटस्थे देहद्वययुता चितिः
॥शुक्तौ रूप्यवदध्यस्ता विक्षेपाध्यास एव हि॥३३॥ इदमंशश्च सत्यत्वं शुक्तिगं रूप्य ईक्ष्यते॥
स्वयंत्वं वस्तुता चैवं विक्षेपे वीक्ष्यतेऽन्यगम्॥३४॥

सोऽविक्षेपाध्यास इत्यर्थः॥३३॥ अस्य विक्षेपस्याध्यासत्वसिद्धये शुक्तिरजताध्याससाम्यं दर्शयति। इदमंशस्येति। शुक्तिकायां स्थितं पुरोदेशादिसंबद्धत्वमबाध्यत्वं च यथारोपिते रजते भासते एवं स्वयंत्वं वस्तुत्वं च कूटस्थनिष्ठमारोपिते चिदाभासेऽवभासत इत्यर्थः॥३४

एवं सामान्यांशाच्छादनीति उभयत्र पृष्ठदर्शी विशेषाच्छादनीति। सामान्ये दर्शयति। नीलेति॥३५॥ सामान्यांतरं दर्शयति
आरोपितस्येति। दृष्टांते शुक्तिस्थले आरोपितपदार्थस्य रूप्यं नाम रूप्यमिति नाम यथा एवं कूटस्थे कल्पि
तचिदाभासरूपविक्षेपस्य पूर्वोक्तस्याहमिति नामेत्यर्थः॥३६॥ ननु दृष्टांते पुरोवर्तिनि शुक्तिशकले

नीलपृष्ठत्रिकोणत्वं यथा शुक्तौ तिरोहितं॥ असंगानंदताद्येवं कूटस्थेऽपि तिरोहितं॥३५॥
आरोपितस्य दृष्टांते रूप्यं नाम यथा तथा॥ कूटस्थाध्यस्तविक्षेपनामाहमिति निश्चयः॥३६॥
इदमंशं स्वतः पश्यन् रूप्यमित्यभिमन्यते॥ तथा स्वं च स्वतः पश्यन्नहमित्यभिमन्यते॥३७॥

इंद्रियसन्निकर्षे जाते सति रूप्यमिदमिति तदतिरिक्तरजताभिमान उपपद्यते नैवं दार्ष्टांतिके आत्मा
तिरिक्तवस्त्वभिमानः स्यादित्याशंक्याह। तथापि स्वप्रकाशात्तया चिदात्मन्यवभासमाने तदतिरिक्तोऽहमित्यभिमा ८

नउपलभ्यतेऽतो न वैषम्यमित्यभिप्रायेणाह। इदमंशमिति॥३७॥ ननु स्वयमहंशब्दयोरेकार्थत्वात्कथं दृष्टां
तदार्ष्टांतिकयोः साम्यमित्याशंक्य इदंशब्दरूप्यशब्दार्थयोः स्वयमहंशब्दार्थयोश्च सामान्यविशेषरूपत्वा
दुभयत्र साम्यमेवमित्याह। इदंत्वरूप्यते इति॥३८॥ स्वयंशब्दार्थस्य सामान्यरूपत्वं स्पष्टीकर्तुं लो

इदंत्वरूप्यते भिन्ने स्वत्वाहंते तथेष्यतां॥ सामान्यं च विशेषश्च उभयत्रापि गम्यते॥३८॥ देव
दत्तः स्वयं गच्छेत्त्वं वीक्षस्व स्वयं तथा॥ अहं स्वयं न शक्तोमीत्येवं लोके प्रयुज्यते॥३९॥ इदं रूप्य
मिदं वस्त्रमिति यद्वदिदं तथा॥ असौ त्वमहमित्येषु स्वयमित्यभिमन्यते॥४०॥

कप्रयोगं ताव
द्दर्शयति। देवदत्त इति॥३९॥ भवत्वयं प्रयोगो लोके कथमेतावता स्वयंशब्दार्थस्य सामान्यरूपत्वमित्या
शंक्य इदंशब्दार्थवदित्याह। इदं रूप्यमिति। यथा रूप्यवस्त्रादौ सर्वत्रेदंशब्दस्य प्रयुज्यमानत्वात् इदमर्थस्य सामा
न्यरूपत्वं तथा असौ त्वमहमित्यादौ सर्वत्र स्वयंशब्दप्रयोगात् तदर्थस्यापि सामान्यरूपत्वमवगम्यत इत्य
र्थः॥४०॥

नवतु स्वयमहंशब्दयोर्लोके भेदः एतावता कूटस्थात्मनि किमायातमिति पृच्छति॥ अहंत्वादिति सामान
रूपः स्वयंशब्दः घटएव कूटस्थइतीदमायातमित्याह॥ स्वयंशब्दार्थ इति॥४२॥ ननु सत्त्वरूपो धर्मोऽन्य

अहंत्वाद्भिद्यतां स्वत्वं कूटस्थे तेन किं तव॥ स्वयंशब्दार्थ एवैष कूटस्थ इति मे भवेत्॥४२॥
अन्यत्ववारकं स्वत्वमिति चेदन्यवारणं॥ कूटस्थस्यात्मतां वक्तुरिष्टमेव हि तद्भवेत्॥
४२॥

त्वं निवारयति न कूटस्थत्वं बोधयतीति शंकते॥ अन्यत्ववारकमिति। स्वयंशब्दार्थस्य कूटस्थ
स्यैवात्मत्वात्स्वत्वेनान्यवारणमिष्टमेवेति परिहरति। अन्यवारणं कूटस्थस्येति॥४२॥ ॐ॥॥ १०

ननु स्वयमात्मशब्दयोर्भिन्नप्रवृत्तिनिमित्तयोर्घटाश्वादिशब्दयोरिवैकार्थत्वाभावात्कथं स्वयंशब्दा
र्थस्य कूटस्थस्यात्मत्वमित्याशंक्य हस्तकरादिशब्दवदेकार्थत्वोपपत्तेर्मैवमिति परिहरति स्वयमात्मे
तिति पर्यायत्वे सहप्रयोगाभावं हेतुमाह तेन लोक इति फलितमाह अतः स्वत्वमिति॥४३॥ ननु घ

स्वयमात्मेति पर्यायौ तेन लोके तयोः सह॥ प्रयोगो नास्त्यतः स्वत्वमात्मत्वं चान्यवारकं॥४३॥
घटः स्वयं न जानातीत्येवं स्वत्वं घटादिषु॥ अचेतनेषु दृष्टं चेद्दृश्यतामात्मसत्त्वतः॥४४॥॥

टादिष्वचेतनेष्वपि स्वयंशब्दस्य प्रयोगदर्शनात्स्वयंत्वात्मत्वयोरेकत्वं न घटत इति शंकते॥ घट इ
ति॥ घटादिष्वपि स्फुरणरूपेणात्मचैतन्यस्य सत्त्वात्तेष्वपि स्वयंशब्दप्रयोगो न विरुध्यत इत्याह॥
दृश्यतामिति॥४४॥

ननु घटादिष्वप्यात्मचैतन्यस्य सत्त्वे चेतनाचेतनविभागो निर्निमित्तकः स्यादित्याशंक्य चेतनाचेतनवि
भागस्य चिदाभाससत्त्वासत्त्वलक्षणकारणसद्भावान्मैवमिति परिहरति। चेतनेति॥४५॥ ननु चेत
नाचेतनविभागस्य चिदाभाससत्त्वासत्त्वप्रयुक्तत्वाभ्युपगमेऽचेतनेष्वात्मसत्त्वाभ्युपगमो निष्प्रयोज

चेतनाचेतनभिदा कूटस्थात्मकृता न हि॥ किंतु बुद्धिकृताभासकृतैवेत्यवगम्यतां॥४५॥
यथा चेतन आभासः कूटस्थे भ्रांतिकल्पितः॥ अचेतनो घटादिश्च तथा तत्रैव कल्पितः
४६

नः स्यादित्याशंक्य चेतनाचेतनविभागहेतुत्वेन कूटस्थस्यानभ्युपगमेऽप्यचेतनकल्पनाधि
ष्ठानत्वेन कूटस्थोऽभ्युपगंतव्य इत्यभिप्रायेण घटादेस्तत्र कल्पितत्वे सदृष्टांतमाह॥ यथा चेतन इति ११
॥४६॥

स्वत्वात्मत्वयोरेकत्वेऽतिप्रसंगं शंकते। तत्तेदंते अपीति त्वमहमादिषु सर्वत्रानुगतस्य स्वत्वस्येव सर्व
त्रानुगतयोस्तत्तेदंतयोरप्यात्मस्वरूपता किं न स्यादिति भावः॥४७॥ तत्तेदंतयोरात्मत्वाधिकवृत्ति
त्वादात्मत्वेन संभवतीत्याह। ते आत्मत्वेपीति। तत्तेदंते स्वत्वमिव यद्यपि त्वमहमादिष्वनुगते तथापि

तत्तेदंते अपि स्वत्वमिव त्वमहमादिषु॥ सर्वत्रानुगते तेन तयोरप्यात्मतेति चेत्॥४७॥
ते आत्मत्वेऽप्यनुगते तत्तेदंते ततस्तयोः॥ आत्मत्वं नैव संभाव्यं सम्यक्त्वादेर्यथा तथा॥
॥४८॥

ते अनुवर्तमाने आत्मत्वेऽप्यनुगते तदात्मत्वमिदमात्मत्वमित्यादिव्यवहारसंभवात् तत्तयोरात्मत्वा
धिकवृत्तित्वादात्मत्वरूपता न संभाव्यते। तत्र दृष्टांतमाह सम्यक्त्वादेरिति॥ आत्मत्वं सम्यगात्मत्वम-
सम्यगिति व्यवहारवशादात्मत्वेऽप्यनुवर्तमानयोः सम्यक्त्वासम्यक्त्वयोरिवेत्यर्थः॥४८॥ ब ॥ ॥ ॥

एवंप्रासंगिकंपरिसमाप्यप्रकृतप्रदर्शनायलोकव्यवहारसिद्ध्यर्थमनुवदति॥तत्रेदंतेइति।तत्रप्रतियो
गित्वमिदंतायास्तदिदमिति॥सत्वंप्रतियोगित्वमन्यत्वस्यस्वयमन्यइतित्वंताप्रतियोगित्वमहंताया
स्त्वहमिति॥लोकेप्रतिद्वंद्वित्वेनप्रयोगदर्शनात्प्रसिद्धमितिभावः॥४९॥भवत्वेवंलोकेप्रकृतेकिमा

तत्रेदंतेस्वतान्यत्वेत्वंताहंतेपरस्परं॥प्रतिद्वंद्वितयालोकेप्रसिद्धेनास्तिसंशयः॥४९॥
अन्यतायाप्रतीद्वंद्वीस्वयंकूटस्थइष्यतां॥त्वंतायाःप्रतियोग्येषोऽहमित्यात्मनिकल्पितः॥५०

यातमित्यतआह।अन्यतायाइति।अन्यत्वप्रतियोगीस्वयंशब्दार्थः।त्वंताप्रतियोग्यहंशब्दार्थस्त्विहा
भासःकूटस्थेकल्पितइत्यर्थः॥५०॥नन्वेवंप्रकारेणजीवकूटस्थयोर्भेदेसत्यपिसर्वेइत्थंकिमितिन
ज्ञायतेइत्याशंक्याह।अहंतेति।बुद्धिमान्द्यतःकूटस्थस्वरूपस्यबुद्ध्याप्रसत्तीकर्तुमशक्यत्वादहमितिप्रति १२

भासमानयोर्जीवकूटस्थयोर्भ्रांत्यैकत्वंप्रतिपन्नाइत्यर्थः॥५१॥नन्वस्यजीवकूटस्थयोरेकत्वभ्रमस्य
किंकारणमित्यपेक्षायामाह॥तादात्म्येति।अत्रास्मिन्ग्रंथेऽनादिरविवेकोयमित्यत्रोक्तयाऽविद्यये
त्यर्थः॥५२॥यतोऽविद्याकार्यत्वमस्यातोऽविद्यानिवर्तकज्ञानेनैवतन्निवृत्तिरित्याह।अविद्यायामि

अहंतास्वत्वयोर्भेदेरूपतोऽदंतयोरिव॥स्पष्टेऽपिमोहमापन्नाएकत्वंप्रतिपेदिरे॥५१॥तादा
त्म्याध्यासएवात्रपूर्वोक्ताविद्ययाकृतः॥अविद्यायांनिवृत्तायांतत्कार्यंविनिवर्तते॥५२॥
अविद्यावृत्तितादात्म्येविद्ययैवविनश्यतः॥विक्षेपस्यस्वरूपंतुप्रारब्धक्षयमीक्षते॥५३॥

ति।नन्वध्यासस्याविद्याकार्यत्वात्तन्निवृत्त्यानिवृत्तिरित्येतदनुपपन्नंब्रह्मात्मैकत्वविद्यायामुत्पन्नाया
मप्यविद्याकार्यस्यदेहादेरुपलभ्यमानत्वादित्यतआह।अविद्यावृत्तीति।अविद्यैककारणयोरावृ
त्तितादात्म्ययोर्विद्ययैवविनिवृत्तिःकर्मसहिताऽविद्याजन्यस्यतुविक्षेपस्वरूपस्यकर्मावसानपर्यं

तमवस्थानमित्यविरोध इति भावः ॥५३॥ ननु प्रारब्धकर्मणो निमित्तमात्रत्वात्तत्सद्भावमात्रेणोपादा
नेविनष्टेऽपि कथं कार्यानुवृत्तिरित्याशंक्य शास्त्रांतरसिद्धदृष्टांतेन तदनुवृत्तिं संभावयति ॥ उपादान
इति ॥५४॥ ननु तार्किकैः कार्यस्य क्षणमात्रमवस्थानमंगीकृतं न चिरकालमित्याशंक्याह ॥ तंतूनामि

उपादाने विनष्टेऽपि क्षणं कार्यं प्रतीक्षते ॥ इत्याहुस्तार्किकास्तद्वदस्माकं किं न संभवेत् ॥५४॥
तंतूनां दिनसंख्यानां तैस्तादृक्क्षण ईरितः ॥ भ्रमस्यासंख्यकल्पस्य योग्यः क्षण इहेष्यतां ॥५५॥

ति । संसारस्यानादिकालमारभ्यानुवृत्तत्वात्संस्कारवशेन चक्रभ्रमवच्चिरकालानुवृत्तिर्न विरुध्यत इति
भावः ॥५५॥ ननु तार्किकैर्यथोक्तमभिहितं न तद्भवतापीत्याशंक्य स्वोक्तौ न तेषां वैषम्यं दर्शयति ॥ वि
नेति । क्षोदक्षमं विचारसहं मानं विना प्रमाणमंतरेणेत्यर्थः । तस्य तावदेव चिरं यावन्न मोक्ष्येऽथ संप १३

त्स्य इति वच्छ्रुतिश्चक्रभ्रमादिदृष्टांतो युक्तिरनुभूतिर्विद्वदनुभवः एतेभ्यः प्रमाणेभ्यः किंनु दुःशकमशक्य
५६ मित्यभिप्रायः प्रकृतमनुसरति आस्तामिति ॥ स्वयमहंशब्दार्थयोः कूटस्थपरिणामिनोरेकत्वं भ्रांत्या

विना क्षोदक्षमं मानं तैर्वृथा परिकल्प्यते ॥ श्रुतियुक्त्यनुभूतिभ्यो वदतां किंनु दुःशकं ॥५६॥
आस्तां दुस्तार्किकैः सार्धं विवादः प्रकृतं ब्रुवे ॥ स्वाहमोः सिद्धमेकत्वं कूटस्थपरिणामिनोः ॥
५७॥ भ्रांतिं ते पंडितंमन्याः सर्वे लौकिकतैर्थिकाः ॥ अनादृत्य श्रुतिं मौर्ख्यात्केवलां युक्तिमा
श्रिताः ५८

सिद्धं ॥५७॥ ननु कूटस्थजीवयोरेकत्वं भ्रांतिसिद्धं चेदिदं भ्रांतमिति केऽपि कुतो न जानंतीत्याशंक्य श्रुतिता
त्पर्यपर्यालोचनशून्यत्वादित्याह ॥ भ्रांतिं त इति ॥५८॥ ७ ॥

ननुश्रुत्यर्थप्रवक्तारोपि केचिदित्थं कुतो न जानंतीत्याशंक्य तेषां साकल्येन श्रुत्यर्थपर्यालोचनाभावा
दित्याह ॥ पूर्वापरेति ॥ ५९ ॥ तत्र तावत्प्रत्यक्षैकप्रमाणाभ्युपगमेनातिस्थूलत्वाल्लोकायतादिपक्षं प्र
थमतोऽनुभाषते ॥ कूटस्थादिति ॥ प्रत्यक्षसिद्धत्वे देहादेरात्मत्वं पारमार्थिकं स्यादित्याशंक्योक्तं प्रत्यक्षाभा

पूर्वापरपरामर्शविकलास्तत्र केचन ॥ वाक्याभासान्स्वस्वपक्षे योजयंत्यप्यलज्जया ॥ ५९
कूटस्थादिशरीरांतसंघातस्यात्मतां जगुः ॥ लोकायताः पामराश्च प्रत्यक्षाभासमाश्रिताः ॥ ६०
श्रौतीकर्तुं स्वपक्षं ते कोशमन्नमयं तथा ॥

समिति ॥ ६० ॥ ते प्रत्यक्षैकप्रमाणवादिनोपि परव्या
मोहनाय स्वमतं श्रुतिसिद्धमिति दर्शयितुं वाक्यमुदाहरंतीत्याह ॥ श्रौतीकर्तुमिति ॥ कोशमन्नमय
मिति शब्देनान्नमयकोशप्रतिपादकं स वा एष पुरुषोऽन्नरसमय इत्यादिकं संलक्ष्यते ॥ विरोचनस्य सि २४

द्धांतमिति नत्सिद्धांतप्रतिपादकमात्मैवेहमहमनुष्यप्य इत्यादिवाक्यं लक्ष्यते ॥ एतद्वाक्यद्वयं प्रमाण
त्वेन प्रतिजानते न एवं नत्प्रतिपादयितुं क्षमाः प्रकरणविरोधादिति भावः ॥ ६१ ॥ अस्मिन्मते दोषप्रद

विरोचनस्य सिद्धांतं प्रमाणं प्रतिजज्ञिरे ॥ ६१ ॥ जीवात्मनिर्गमे देहमरणस्यात्र दर्शनात
॥ देहातिरिक्त एवात्मेत्याहुर्लोकायताः परे ॥ ६२ ॥ प्रत्यक्षत्वेनाभिमताहंधीर्देहातिरेकि
णं ॥ गमयेदिंद्रियात्मानं वच्मीत्यादिप्रयोगतः ॥ ६३ ॥

र्शनपुरःसरं मतांतरमुत्थापयति ॥ जी
वात्मेति ॥ ६२ ॥ कीदृशो देहातिरिक्त आत्मा केन वा प्रमाणेनावगम्यत इत्याशंक्यामाह ॥ प्रत्यक्षत्वेनेति
॥ अहं वच्मि अहं पश्यामीत्यादिप्रयोगदर्शनाद्देहातिरिक्ताहंबुद्धिगम्यानींद्रियाण्यात्मेत्यर्थः ॥ ६३ ॥

नन्विन्द्रियाणामचेतनानां कथमात्मत्वमित्याशङ्क्य श्रुतिसिद्धेन्द्रियसंवादश्रवणाच्चेतनत्वमसिद्धमि
त्याह। वागादीनामिति। चेतनत्वस्यैवात्मलक्षणत्वाच्चेतनानामिन्द्रियाणामात्मत्वमुचितमित्याह॥
आत्मत्वमिति॥४॥ मतान्तरमुत्थापयति। हैरण्यगर्भ इति॥५॥ प्राणस्यात्मत्वे श्रौतलिङ्गानीति द

वागादीनामिन्द्रियाणां कलहः श्रुतिषु श्रुतः॥ तेन चैतन्यमेतेषामात्मत्वं तत एव हि॥४॥
हैरण्यगर्भाः प्राणात्मवादिनस्त्वेवमूचिरे॥ चक्षुराद्यक्षलोपेऽपि प्राणसत्त्वे तु जीवति॥५॥
प्राणो जागर्ति सुप्तेऽपि प्राणश्रैष्ठ्यादिकं श्रुतं॥ कोशः प्राणमयः सम्यग्विस्तरेण प्रपञ्चितः॥६॥

र्शयति प्राण इति। प्राण एवैष एतस्मिन्पुरे जागर्तीत्यादिना प्राणजागरणं श्रूयते। तत्प्राणे ह प्रपन्न उदतिष्ठ
तदुक्थमभवत्तदेतदुक्थ्यमिति प्राणस्य श्रैष्ठ्यादिकं श्रूयते। अन्योऽन्तर आत्मा प्राणमय इत्यादिना प्राणमय १५

कोशः प्रपञ्चितः आदिशब्देन प्राणसंवादप्रवेशादिकं ग्राह्यं॥६॥ प्राणादप्यन्तरस्य मनस आत्मत्ववा
दिनो मतं दर्शयति॥ मन आत्मेतीति॥ प्राणस्यानात्मत्वे युक्तिमाह॥७॥ प्राणस्येति॥७॥ मनस आ
त्मत्वे युक्तिप्रतिपादिकां श्रुतिमाह॥ मन एवेति। तस्माद्वा एतस्मात्प्राणमयात् अन्योऽन्तर आत्मा मनो

मन आत्मेति मन्यन्ते उपासनपरा जनाः॥ प्राणस्याभोक्तृता स्पष्टा भोक्तृत्वं मनसस्ततः॥७॥
मन एव मनुष्याणां कारणं बन्धमोक्षयोः॥ श्रुतो मनोमयः कोशस्तेनात्मेतीरितं मनः॥८॥
विज्ञानमात्मेति परे आहुः क्षणिकवादिनः॥ यतो विज्ञानमूलत्वं मनसो गम्यते स्फुटं॥९॥

मय इति श्रुत्यन्तरं दर्शयति। श्रुत इति। फलितमाह। तेनेति॥८॥ मनसोऽप्यान्तरस्य विज्ञानस्यात्म
त्ववादिनो बौद्धस्य मतं दर्शयति। विज्ञानमिति। विज्ञानस्यान्तरत्वे युक्तिमाह। यत इति॥९॥ ७ ॥ ॥

विज्ञानमनःशब्दवाच्यस्यांतःकरणस्यैकत्वात्कथं मनोविज्ञानयोः कार्यकारणभाव इत्याशंक्य तदु
पपादयितुं तयोर्भेदं तावद्दर्शयति॥ अहंवृत्तिरिति॥७०॥ तयोः कार्यकारणभावमाह॥ अहंप्रत्य
यबीजत्वमिति॥ तदेवोपपादयति॥ अविदित्वेति॥ अहंवृत्त्युदयाभावे इदंवृत्त्यनुदयात्तयोः कार्यका

अहंवृत्तिरिदंवृत्तिरित्यंतःकरणं द्विधा॥ विज्ञानं स्यादहंवृत्तिरिदंवृत्तिर्मनो भवेत्॥७०॥
अहंप्रत्ययबीजत्वमिदंवृत्तेरिति स्फुटं॥ अविदित्वा स्वमात्मानं बाह्यं वेत्ति न तु क्वचित्॥
७१॥ क्षणे क्षणे जन्मनाशावहंवृत्तेर्मितौ यतः॥ विज्ञानं क्षणिकं तेन स्वप्रकाशं स्वतो मितेः॥
७२॥

रणभाव इत्यर्थः॥७१॥ तस्य विज्ञानस्य क्षणिकत्वेऽनुभवं प्रमाणयति॥ क्षणे क्षण इति॥ क्ष
णिकत्वमुपपाद्य स्वप्रकाशत्वमुपपादयति॥ स्वप्रकाशमिति॥ स्वेनैव प्रमितत्वादित्यर्थः॥७२॥ ॥ १९

विज्ञानस्यात्मत्वे आगमः प्रमाणमित्याह॥ विज्ञानमयेति॥ तस्माद्वा एतस्मान्मनोमयात् अन्योंतर आ
त्मा विज्ञानमयः विज्ञानं यज्ञं तनुते इत्यादि वाक्यं विज्ञानस्यात्मप्रतिपादकमिति भावः॥७३॥ बौद्धा

विज्ञानमयकोशोयं जीव इत्यागमा जगुः॥ सर्वसंसार एतस्य जन्मनाशसुखादिकः॥७३॥ वि
ज्ञानं क्षणिकं नात्मा विद्युदभ्रनिमेषवत्॥ अन्यस्यानुपलब्धत्वाच्छून्यं माध्यमिका जगुः॥७४॥
असदेवेदमित्यादाविदमेव श्रुतं ततः॥ ज्ञानज्ञेयात्मकं सर्वं जगद्भ्रांतिप्रकल्पितं॥७५॥ ब॥

वांतरभेदस्य शून्यवादिनो मतं दर्शयति॥ विज्ञानमिति॥७४॥ तत्र श्रुतिमाह॥ असदेवेदमितीति॥ शू
न्यस्यैव तद्रूपत्वे प्रतीयमानस्य जगतः का गतिरित्यत आह॥ ज्ञानेति॥७५॥ तदेतन्मतं दूषयति॥ नि
रधिष्ठानेति॥ निःस्वरूपस्य शून्यस्याधिष्ठानत्वायोगान्निरधिष्ठानस्य भ्रमस्यानुपपत्तेर्जगत्कल्पनाधि

चि॰ दी॰
२७

ष्ठानस्यात्मनः सत्त्वाभ्युपगंतव्या॥ किंच। अन्यवादिनापि अस्य साक्षित्वेनावश्यमात्माभ्युपगंतव्यः। अन्यथा तस्यानभ्युपगमे अस्य अन्यसोक्तिः अन्यमित्यभिधानं ते बौद्धस्य त्वन्मते न सिद्ध्येदिति भावः॥७६॥ कुत्र पर्यालोचितमित्यत आह। अन्य इति। तस्माद्वा एतस्माद्विज्ञानमयात् अन्योंतर आत्मानंदमय अस्तीत्येवोप

निरधिष्ठानविभ्रांतेरभावादात्मनोऽस्तिता॥ अस्यस्यापि ससाक्षित्वादन्यथा नोक्तिरस्य ते॥७६॥
अन्योऽविज्ञानमयतस्त्वानंदमय आंतरः॥ अस्तीत्येवोपलब्धव्य इति वैदिकदर्शने॥७७॥ अणु
र्महान्मध्यमो वेत्येवं तत्रापि वादिनः॥ बहुधा विवदंते हि श्रुतियुक्तिसमाश्रयात्॥७८॥ व ॥

लब्धव्यस्तत्त्वभावेनेति च श्रुतिसद्भावादानंदमय आत्माभ्युपगंतव्य इति वैदिकदर्शनं वैदिकसिद्धांतः॥७७॥ एवमात्मस्वरूपे विप्रतिपत्तिं प्रदर्श्य तत्परिमाणविशेषेपि वादिविप्रतिपत्तिं दर्शयति। अणुरिति॥ ७८

अत्राणुत्ववादिनस्तावद्दर्शयति। अणुमिति। अणुत्वाभिधाने हेतुमाह। सूक्ष्मेति। तदुपपादयति। रोम्ण इति। नाडीश्रितिशेषः। सूक्ष्मासु नाडीषु संचारोऽणुत्वमंतरेण न घटत इत्यभिप्रायः॥७९॥ अणुत्वे किं प्रमाणमित्यत आह। अणोरिति॥ अणोरणीयान्महतो महीयानेषोऽणुरात्मा चेतसा वेदितव्यः॥

अणुं वदंत्यांतराला: सूक्ष्मनाडीप्रचारतः॥ रोम्णः सहस्रभागेन तुल्यासु प्रचरत्ययं॥७९॥
अणोरणीयानेषोऽणुः सूक्ष्मात्सूक्ष्मतरं त्विति॥ अणुत्वमाहुः श्रुतयः शतशोऽथ सहस्रशः
॥८०॥ वालाग्रशतभागस्य शतधा कल्पितस्य च॥ भागो जीवः स विज्ञेय इति चाह परा श्रुतिः
८१

सूक्ष्मात्सूक्ष्मतरं नित्यमित्यादिश्रुतय इत्यर्थः॥८०॥ श्रुत्यंतरमुदाहरति। वालाग्रेति॥८१॥ मध्यमपरिमाणवादिनो दर्शयति॥ दिगंबरा इति॥ तत्रोपपत्तिमाह। आपादेति। स एष इह प्रविष्ट आनखा-

ग्रेप्य इति श्रुतिरप्यत्र प्रमाणमित्याह। आनखाग्रेति॥८२॥ ननु मध्यमपरिमाणमित्वे श्रुतिसिद्धो नाडीप्रचारो
न घटते तस्मात् शंकाह। सूक्ष्मनाडीति। यथा देहावयवयोर्हस्तयोः कंचुकप्रवेशेन देहस्य कंचुकप्रवेश
स्तद्वदात्मावयवानां सूक्ष्माणां नाडीषु प्रचारेणात्मनोपि प्रचार उपचर्यत इत्यर्थः॥८३॥ नन्वात्मनो

दिगंबरा मध्यमत्वमाहुरापादमस्तकं॥ चैतन्यव्याप्तिसंदृष्टेरानखाग्रश्रुतेरपि॥८२॥ सू
क्ष्मनाडीप्रचारस्तु सूक्ष्मैरवयवैर्भवेत्॥ स्थूलदेहस्य हस्ताभ्यां कंचुकप्रतिमोकवत्॥८३॥
((सांशस्य घटवन्नाशो भवत्येव तथा सति॥ कृतनाशाकृताभ्यागमयोः को वारको)) न्यूनाधिक
शरीरेषु प्रवेशोपि गमागमैः॥ आत्मांशानां भवेत्तेन मध्यमत्वं विनिश्चितं॥८४॥

नियतमध्यमपरि
माणत्वे कर्मवशान्न्यूनाधिकशरीरप्रवेशो न घटत इत्याशंक्यावयवागमापायाभ्यामात्मनो नियतमध्य १८

मपरिमाणत्वाद्देहवदुभयं न विरुध्यत इत्याह॥ न्यूनाधिकेति। फलितमाह। तेनेति॥८४॥ आत्मनः सावय
वत्वे घटादिवदनित्यत्वप्रसंगेनैतद्दूषयति। सांशस्येति। भवतु को दोषस्तत्राह। तथा सतीति। कृतयोः पुण्य

सांशस्य घटवन्नाशो भवत्येव तथा सति॥ कृतनाशाकृताभ्यागमयोः को वारको भवेत्॥८५॥
तस्मादात्मा महानेव नैवाणुर्नापि मध्यमः॥ आकाशवत्सर्वगतो निरंशः श्रुतिसम्मतः॥८६॥
इत्युक्तात्मविशेषे तु बहुधा कल्पयंत्यमुं॥ अचिद्रूपोऽयं चिद्रूपश्चिदचिद्रूप इत्यपि॥८७॥ ३॥

पापयोर्भोगमंतरेण नाशः। अकृतयोरकस्मात्फलदातृत्वमकृताभ्यागमः। एतद्दोषद्वयमात्मनोऽ
नित्यत्वाभ्युपगमे भवेदिति भावः॥८५॥ अतः परिशेष्यादात्मनो विभुत्वं सिद्धमित्याह। तस्मादिति।
तत्र प्रमाणमाह। आकाशवदिति। आकाशवत्सर्वगतश्च नित्यः निष्कलो निष्क्रियमित्याद्यागमः प्रमा

वि॰टी॰ २९

णमित्यर्थः ॥८६॥ एवमात्मनो विभुत्वं प्रसाध्य तस्य चिद्रूपत्वं निषेद्धुं तावद्वादिविप्रतिपत्तिं दर्शयति । इ
त्युक्तेति ॥८७॥ अचिद्रूपत्ववादिनो दर्शयति । प्राभाकरा इति । तत्त्वक्रियामनु[illegible]भाषते ॥ आकाशवद्वि
भुमिति ॥ आत्मा द्रव्यं भवितुमर्हति गुणवत्त्वादाकाशवदित्यनुमानं सूचितं । आत्मनः पृथिव्यादिभ्यो

प्राभाकरास्तार्किकाश्च प्राहुरस्याचिदात्मतां ॥ आकाशवद्द्रव्यमात्मा शब्दवत्तद्गुणस्थितिः
८८ ॥ इच्छाद्वेषप्रयत्नाश्च धर्माधर्मौ सुखासुखे ॥ तत्संस्काराश्च तस्यैते गुणाश्चितिवदीरिताः
॥८९॥

भेदसाधकं विशेषगुणं दर्शयति ॥ शब्दवदिति ॥ आत्मा पृथिव्यादिभ्यो भिद्यते ज्ञानगुणकत्वात् यत्पृथिव्या
दिभ्यो न भिद्यते तत् ज्ञानगुणकमपि न भवति यथा पृथिव्यादीत्यनुमाने द्रष्टव्ये ॥८८॥ तस्यैव विशेष
गुणान्तराण्याह इच्छेति ॥८९॥ २९

तत्संस्कारा भावनाः एषां गुणानामुत्पत्तिविनाशकारणमाह ॥ आत्मन इति ॥ स्वादृष्टवशतः आत्मनो म
नसा योग इत्यन्वयः ॥९०॥ आत्मनोऽचिद्रूपत्वे कथं चेतनत्वात्मकपरामर्श इत्याशंक्य चितिमत्त्वादित्या
ह ॥ चितिमत्त्वादिति ॥ आत्मनश्चेतनत्वे हेत्वन्तरमाह ॥ इच्छेति । तस्येश्वराद्भेदलक्षणमाह ॥ स्यादिति ॥

आत्मनो मनसा योगे स्वादृष्टवशतो गुणाः ॥ जायन्तेऽथ प्रलीयन्ते सुषुप्तेऽदृष्टसंक्षयात् ॥
९० ॥ चितिमत्त्वाच्चेतनोऽयमिच्छाद्वेषप्रयत्नवान् ॥ स्याद्धर्माधर्मयोः कर्ता भोक्ता दुःखादिमत्त्व
तः ॥९१॥ यथाऽत्र कर्मवशतः कादाचित्कं सुखादिकं ॥ तथा लोकान्तरे देहे कर्मणेच्छादि जन्यते
॥९२॥

॥९२॥ नन्वात्मनो विभुत्वे लोकान्तरगमनादिकं कथं घटते इत्याशंक्यास्मिन्देहे कर्मवशादिच्छाद्यु
त्पत्तौ सत्यामात्मनो वस्थानादिव्यवहार इव कर्मवशाल्लोकान्तरे देहान्तरोत्पत्तौ तदवच्छिन्नात्म
प्रदेशे सुखाद्युत्पत्तिवशात्तत्रात्मनो गमनादिव्यवहार इत्यौपचारिकमात्मनो गमनादिकमित्य

भिप्रेत्याह। यथात्र कर्मवशत इति ॥८२॥ आत्मनः कर्तृत्वादिधर्मवत्त्वे किं प्रमाणमित्यत आह ॥ कर्म
कांड इति।८३॥ नन्वन्यो विज्ञानमयत आनंदमय आंतर इत्यत्रानंदमयस्यात्मत्वमुक्तमिदानीमि
च्छादिमानन्यः प्रतिपाद्यतेऽतः पूर्वोत्तरविरोध इत्याशंक्याह। आनंदमयेति। सुषुप्तावस्थाविद्य आनंदम

कर्मकांडं च सर्वगस्यापि संभवेतां गमागमौ ॥ कर्मकांडः समर्थोऽत्र प्रमाणमिति तेऽवदन् ॥८३
आनंदमयकोशो यः सुषुप्तौ परिशिष्यते ॥ अस्पष्टचित्स आत्मैषां पूर्वकोशोऽस्य ते गुणाः ॥८४
गूढं चैतन्यमुत्प्रेक्ष्य जडबोधस्वरूपतां ॥

यकोशः। परिशिष्यते पूर्वकोशाः अन्तेषु पंचकोशेषु प्र
थमा एषां प्रभाकरादीनामात्मानो द्वयोर्गुणा इत्यर्थः ॥८४॥ अस्यैवात्मनश्चिदचिद्रूपत्वं भाट्टा वर्णयं
तीत्याह ॥ गूढमिति। भाट्टा आत्मनो गूढमस्पष्टं चैतन्यमुत्प्रेक्ष्य बुद्धित्वा चिज्जडोभयात्मकतां वर्ण। २०
अस्यात्मनस्तत्पूर्वोक्ता २

येति। चैतन्योत्प्रेक्षायां कारणमाह ॥ चिदुत्प्रेक्षेति। उत्थितस्मृतेश्चिदुत्प्रेक्षा भवतीति योजना ॥ सुप्तेरुत्थि
तस्य जायमानात्स्मरणात् सौषुप्तचैतन्यस्योत्प्रेक्षा भवतीत्यर्थः ॥८५॥ चिदुत्प्रेक्षाप्रकारमेव स्पष्टय
ति। जडो भूत्वेति। तदा सुषुप्तिकाले जडो भूत्वाऽस्वाप्समित्येवंरूपा जाड्यस्मृतिरुत्थितस्य पुरुषस्य जाय

आत्मनो ब्रुवते भाट्टाश्चिदुत्प्रेक्षोत्थितस्मृतेः ॥८५॥ जडो भूत्वा तदास्वाप्समिति जाड्यस्मृतिस्त
दा ॥ विना जाड्यानुभूतिं न कथंचिदुपपद्यते ॥८६॥ द्रष्टुर्दृष्टेरलोपश्च श्रुतः सुप्तौ ततस्त्वयं ॥ अ
प्रकाशप्रकाशाभ्यामात्मा खद्योतवद्युतः ॥८७॥

माना सुषुप्तिकालीनजाड्यानुभवमंतरेणानु
पपद्यमाना तदानीं तज्जाड्यानुभवं कल्पयतीति भावः ॥८६॥ सुषुप्तं चैतन्यसद्भावे प्रमाणमा
ह। द्रष्टुरिति। नहि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादिति श्रुतेः सुषुप्तौ चैतन्यसद्भावः श्रु

यतेनतोपिकारणादयमात्माखद्योतवदस्फुरणस्फुरणस्वभावोभवतीत्यर्थः॥९७॥अस्मिन्नाह
मतेदूषणाभिधानपुरःसरंसांख्यमतमुत्थापयति॥निरंशस्येति॥९८॥नास्यस्यात्मनस्तर्हिकागति
रित्याशंक्याह॥नास्यांशाइति॥तत्प्रकृतिरूपंसत्वरजस्तमोगुणात्मकं॥प्रकृतिकल्पनायांप्रयोजन

निरंशस्योभयात्मत्वंनकथंचित्घटिष्यते॥तेनचिद्रूपएवात्मेत्याहुःसांख्यविवेकिनः
९८॥नास्यांशाःप्रकृतेरूपंविकारित्रिगुणंचतत्॥चितोभोगापवर्गार्थंप्रकृतिःसाप्रव
र्तते॥९९॥असंगायाश्चितेर्बंधमोक्षौभेदाग्रहान्मतौ॥बंधमुक्तिव्यवस्थार्थंपूर्वेषामिवचिद्भि
दा१००

माह॥चितइति॥चितःपुरुषस्येतियावत्॥९९॥ननुचितोऽसंगत्वेनप्रकृतिपुरुषयोरसंगतवि
विक्तत्वात्प्रकृतिप्रवृत्ताकथंपुरुषस्यभोगापवर्गावित्याशंक्यतयोर्विवेकस्याग्रहणात्पुरुषेभोगापवर्गौव्य २१

वह्रियेतेइत्याह॥असंगायाइति॥तार्किकादिभिरिवसांख्यैरात्मभेदोंगीक्रियतइत्याह॥बंधमुक्तीति॥१००
प्रकृतिसद्भावपुरुषस्यासंगत्वेचश्रुतिमुदाहरति॥महतइति॥१॥एवंजीवविषयांवादिविप्रतिपत्तिं

महतःपरमव्यक्तमितिप्रकृतिरुच्यते॥श्रुतावसंगतातद्वदसंगोहीत्यतःस्फुटा॥१०१॥
चित्संनिधौप्रवृत्तायाःप्रकृतेर्हिनियामकं॥ईश्वरंब्रुवतेयोगाःसजीवेभ्यःपरःश्रुतः॥१०२
प्रधानक्षेत्रज्ञपतिर्गुणेशइतिहिश्रुतिः॥आरण्यकेसंभ्रमेणह्यंतर्याम्युपपादितः॥१०३॥

प्रदर्श्येश्वरविषयांतांप्रदर्शयितुमीश्वररूपंतावत्कल्पयति॥चित्संनिधाविति॥ननुप्रकृतिपुरुषा
तिरिक्तेश्वरकल्पनेप्रमाणमित्याशंक्याह॥सजीवेभ्यइति॥२॥तामेवेश्वरसद्भावप्रतिपादिकांश्रुति
पठति॥प्रधानेति॥प्रधानंगुणसाम्यावस्थारूपंक्षेत्रज्ञाजीवास्तेषांपतिः॥गुणाःसत्वादयस्तेषामी

शो नियामक इत्यर्थः ॥ न केवलं नियममेव श्रुतिरीश्वरं प्रतिपादितान्तर्यामिब्राह्मणमपीत्याह ॥ आरण्य
क इति ॥ ३ ॥ तामेव वादिप्रतिपत्तिं प्रति जानीते। अत्रापीति। प्रत्तामनतिक्रम्य यथा प्रज्ञं ॥ ४ ॥ इदानी
पतिंजलिनोक्तमीश्वरप्रतिपादकं क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर इत्येतत्सू

अत्रापि कलहायंते वादिनः स्वस्वयुक्तिभिः ॥ वाक्यान्यपि यथाप्रज्ञं दार्ढ्यायोदाहरंति हि
॥ १०४ ॥ क्लेशकर्मविपाकैस्तदाशयैरप्यसंयुतः ॥ पुंविशेषो भवेदीशो जीववत्सोप्यसंग
चित् ॥ १०५ ॥ तथापि पुंविशेषत्वाद्घटतेऽस्य नियंतृता ॥

त्रमर्थतः पठति। क्लेशेति। क्लेशा अविद्या
दयः कर्माणि कर्माशुक्लकृष्णं योगिनस्त्रिविधमितरेषामिति सूत्रितानि। सति मूले तद्विपाको जात्या
युर्भोगा इत्युक्ताः कर्मविपाकाः फलविशेषास्तदाशयास्तेषां संस्कारास्तैः क्लेशादिभिरसंस्पृष्टः पु ॥ २२

रुषविशेष ईश्वरो भवति ॥ सोपि जीववदसंगश्चिद्रूपश्चेत्यर्थः ॥ ५ ॥ नन्वसंगचिद्रूपत्वे कथं नियंतृत्व
मित्यत आह। तथापीति। ईश्वरस्य नियंतृत्वानुपपत्तिमेव दोषमाह ॥ अव्यवस्थाविति ॥ ६ ॥ असंगस्ये
श्वरस्य नियंतृत्वे निष्प्रमाणकमित्याशंक्याह ॥ भीषेति। तन्नियंतृत्वं श्रुतं। ननु श्रुतमप्ययुक्तं कथं

अव्यवस्थौ बंधमोक्षावापतेतामिहान्यथा ॥ १०६ ॥ भीषास्मादित्येवमादावसंगस्य परा
त्मनः ॥ श्रुतं तद्युक्तमप्यस्य क्लेशकर्माद्यसंगमात् ॥ १०७ ॥ जीवानामप्यसंगत्वात्क्लेशादिर्न
त्वथापि च ॥ विवेकाग्रहतः क्लेशकर्मादि प्रागुदीरितं ॥ १०८ ॥ ॥

संगीक्रियत इत्यत आह। युक्तम
पीति। जीवधर्मस्य क्लेशादेरभावादुपपन्नं चेत्यर्थः ॥ ७ ॥ ननु जीवा अप्यसंगचिद्रूपाः क्लेशादिरहिता
एव तथा चेश्वरे को विशेष इत्याशंक्य जीवानां स्वतः क्लेशादिरहितत्वेपि बुद्ध्या सह विवेकाग्रहात्क्लेशा

पं.टी. ३

द्धिरस्तीति पूर्वोक्तं स्मारयति॥ जीवानामिति॥ ८॥ नाकिकास्त्वसंगस्य नियामकत्वमसहमाना जीव
विलक्षणत्वाय ज्ञानादिगुणत्रयं नित्यमंगीकुर्वत इत्याह॥ नित्यज्ञानेति॥ ९॥ ननु इच्छादिगुणकस्य
तस्य कथं जीवाद्वैलक्षण्यमित्याशंक्य गुणानामनित्यत्वादेवेति परिहरति॥ पुंविशेषत्वमिति॥ गुणा॰

नित्यज्ञानप्रयत्नेच्छागुणानीशस्य मन्वते॥ असंगस्य नियंतृत्वमयुक्तमिति तार्किकाः॥१०९
पुंविशेषत्वमप्यस्य गुणैरेव न चान्यथा॥ सत्यकामः सत्यसंकल्प इत्यादिश्रुतिर्जगौ॥११०॥
नित्यज्ञानादिमत्त्वेस्य सृष्टिरेव सदा भवेत्॥ लिंगसत्त्वेपि जीवत्वे हिरण्यगर्भ ईशोतो लिंगदेहे
न संयुतः ११

नां नित्यत्वे प्रमाणमाह॥ सत्येति॥१०॥ तत्रापि दोषसद्भावात्पक्षांतरमाह॥ नित्येति॥ तस्य हिरण्यगर्भ
स्य किंरूपमित्यत आह॥ लिंगदेहेनेति॥ मायोपाधिकः परमात्मा लिंगशरीरसमष्ट्यभिमानेन हिरण्यग २३

र्भ इत्युच्यत इत्यर्थः॥११॥ हिरण्यगर्भस्येश्वरत्वे किं प्रमाणमित्यत आह॥ उद्गीथेति॥ ननु लिंगशरीरयो
गे जीवः स्यादित्याशंक्याविद्याकामकर्माभावान्न जीव इत्याह॥ लिंगसत्त्वेपीति॥१२॥ केवलं लिंगश॰
रीरस्य स्थूलशरीरं विहायानुपलभ्यमानत्वात्स्थूलशरीरसमष्ट्यभिमानी विराडेवेश्वर इत्याह

उद्गीथब्राह्मणे तस्य माहात्म्यमतिविस्तरम्॥ लिंगसत्त्वेपि जीवत्वं नास्य कर्माद्यभावतः॥
१२॥ स्थूलदेहं विना लिंगदेहो न क्वापि दृश्यते॥ वैराजो देह ईशोतः सर्वतो मस्तकादिमान्
॥१३॥ सहस्रशीर्षेत्येवं हि विश्वतश्चक्षुरित्यपि॥ श्रुतमित्याहुरनिशं विश्वरूपस्य चिंतकाः
॥१४॥

स्थूलदेहं विनेति॥१३॥ ८ ॥ तत्सद्भावे प्रमाणमाह॥ सहस्रशीर्षेति॥ श्रुतं वाक्यमिति शेषः॥ विश्व
रूपस्य चिंतकाः विराडुपासकाः॥१४॥ अत्रापि दोषदृष्ट्या देवतांतरमाह॥ सर्वत इति

॥२५॥ एवं कैरुच्यत इत्यत आह ॥ पुत्रार्थमिति ॥ प्रजापति प्रजा असृजत इत्यादि वाक्यं तत्र प्रमाण
मित्याहुरित्याह ॥ प्रजापतिरिति ॥२६॥ भागवतं मतमाह ॥ विष्णोरिति ॥२७॥ शैवानां मतमाह

सर्वतः पाणिपादत्वेऽकस्मादेरपि चेशता ॥ ततश्चतुर्मुखो देवः एवेशो नेतरः पुमान् ॥२५॥
पुत्रार्थं तमुपासीना एवमाहुः प्रजापतिं ॥ प्रजा असृज्यत इत्यादि श्रुतीश्चोदाहरंत्यमी ॥२६॥
विष्णोर्नाभेः समुद्भूतो वेधाः कमलजस्ततः ॥ विष्णुरेवेश इत्याहुर्लोके भागवता जनाः ॥२७॥
शिवस्य पादावन्वेष्टुं शार्ङ्ग्यशक्तस्ततः शिवः ॥ ईशो न विष्णुरित्याहुः शैवा आगममानिनः
॥२८॥ पुरत्रयसाधयितुं विघ्नेशं सोऽप्यपूजयत् ॥ विनायकं प्राहुरीशं गाणपत्यमते रताः ॥२९॥

शिवस्येति ॥२८॥ गाणपत्यमतमाह ॥ पुरत्रयमिति ॥२९॥ उक्तमायमन्यत्राप्यतिदिशति ॥ एवमिति ॥

अमे भैरवमैरालाद्युपासकाः अन्यथा अन्यथा वर्णने कारणमाह ॥ स्वस्वेति ॥ तत्र तत्र प्रमाणानि सं
तीति दर्शयति ॥३०॥ एवं कतिमतानि संतीत्याशंक्यासंख्यानीत्याह ॥ अंतर्यामिणमिति ॥ स्थावरेशवा

एवमन्ये स्वस्वपक्षाभिमानेनान्यथान्यथा ॥ मंत्रार्थवादकल्पादीनाश्रित्य प्रतिपेदिरे ॥३०॥
अंतर्यामिणमारभ्य स्थावरांतेशवादिनः ॥ संत्यश्वत्थार्कवंशादेः कुलदैवत्वदर्शनात् ॥
॥३१॥ तत्त्वनिश्चयकामेन न्यायागमविचारिणां ॥ एकैव प्रतिपत्तिः स्यात्साप्यत्र स्फुटमुच्यते ॥
॥३२॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरं ॥ अस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥३३॥

दिनः क्वापि दृष्टचर इत्याशंक्याह ॥ अश्वत्थार्केति ॥३१॥ नन्वेवं मतभेदे कस्योपादेयत्वं कस्य वा हेयत्व
मित्याकांक्षायामाह ॥ तत्त्वनिश्चयेति ॥ तत्त्वनिश्चयकामेन तत्त्वनिश्चयेच्छया ॥ न्यायागमयोर्विचारण

वे·टी·
२५

णीजानां पुरुषाणां प्रतिपत्तिरेकैव स्यात्। सा कीदृशी स्यात् तत्राह॥ मायेति॥२३॥ तामेव प्रतिपत्तिं दर्श
यितुं तदनुकूलां श्रुतिं पठति॥ मायां त्विति। मायामेव प्रकृतिं जगदुपादानकारणं विद्यात् जानीयात्॥
मायिनं तु मायोपाधिकमंतर्यामिणमेव महेश्वरं मायाधिष्ठातारं निमित्तकारणं जानीयात्॥ अस्य मा

इति श्रुत्यनुसारेण मायी निर्णीय ईश्वरे॥ तथा सत्यविरोधः स्यात्स्थावरंतेशवादिनो॥२४॥
माया चेयं तमोरूपा तापनीये तदीरणात्॥ अनुभूतिं तत्र मानं प्रतिजज्ञे श्रुतिः स्वयं॥२५॥

यिनो महेश्वरस्यावयवभूतैरंशरूपैश्चराचरात्मकैर्जीवैः कृत्स्नमिदं जगद्व्याप्तमित्यस्याः श्रुतेरर्थः॥२३
एतच्छ्रुत्यनुसारेणेश्वरविषयो निर्णयो युक्त इत्याह॥ इतीति॥ कुतो युक्त इत्याशंक्य सर्ववचाविरुद्धत्वादि
त्याह॥ तथेति॥ सर्वस्यापीश्वरत्वाभ्युपगमात् केनापि विरोध इति भावः॥२४॥ ननु जगत्प्रकृतिभूता- २५

या मायायाः किं रूपमित्यत आह॥ माया चेयमिति॥ कुत इत्यत आह। तापनीय इति। माया च तमोरू
पेति तापनीयोपनिषदि तमोरूपत्वस्याभिधानादित्यर्थः॥ मायायास्तमोरूपत्वे किं प्रमाणमित्याकां
क्षायामनुभूतिरिति श्रुतिरेवात्रानुभवः प्रमाणमिति प्रतिजानीत इत्याह॥ अनुभूतिमिति॥२५॥ तत्र

जडं मोहात्मकं तच्चेत्यनुभावयति श्रुतिः॥ आबालगोपं स्पष्टत्वादानंत्यं तत्र साब्रवीत्॥
॥२६॥ अचिदात्मघटादीनां यत्स्वरूपं जडं हि तत्॥ यत्र कुंठीभवेद्बुद्धिः स मोह इति लौकिकाः॥२७

मायायास्तमोरूपत्वे कोसावनुभव इत्याकांक्षायां तदेतज्जडं मोहात्मकमिति श्रुतिरेवानुभवं स्पष्टय
न्तीत्याह॥ जडमिति। आनंत्यमिति श्रुत्या सर्वानुभवसिद्धत्वमुच्यत इत्याह। आबालेति॥२६॥ जडशब्द
स्यार्थमाह॥ अचिदात्मेति। मोहशब्दार्थमाह॥ यत्रेति॥२७॥ उक्तप्रकारेण सर्वानुभवसिद्धत्वे लक्षणमानं
त्यसिद्धमित्याह इत्थमिति॥ ॥

एतज्ज्ञाप्यमोहलक्षणतमोरूपत्वेन। नन्वेवं मायायाः सर्वानुभवसिद्धत्वे घटादिवत् ज्ञानेनानिवर्त्यत्वं
स्यादित्याशंक्याह। युक्तीति॥ तुशब्दः शंकाव्यावृत्त्यर्थः॥ अनिर्वाच्यं सत्त्वेनासत्त्वेन सदसत्त्वेन वा नि
र्वक्तुमशक्यं। तत्र किं प्रमाणमित्यत आह। नासदासीदिति॥२८॥ अस्याः श्रुतेरभिप्रायमाह। नासदि

इत्थं लौकिकदृष्ट्यैतत्सर्वैरप्यनुभूयते॥ युक्तिदृष्ट्या त्वनिर्वाच्यं नासदासीदिति श्रुतेः॥२८॥
नासदासीद्विभातत्वान्नो सदासीच्च बाधनात्॥ विद्यादृष्ट्या श्रुतं तुच्छं तस्य नित्यनिवृत्तितः॥
२९॥

ति। बाधनान्नेह नानास्ति किंचनेति श्रुत्या निषेधादित्यर्थः॥ सदसद्रूपत्वं तु विरुद्धत्वादयुक्तमिति
श्रुत्योपेक्षितं॥ एवं युक्तिदृष्ट्याऽनिर्वचनीयत्वं प्रदर्श्य तुच्छमिदं रूपमस्येति श्रुतिविद्वदनुभवेन त
स्यास्तुच्छत्वं दर्शयतीत्याह॥ विद्येति। तुच्छत्वे हेतुमाह। तस्येति॥२९॥ उपपादितमर्थमुपसंहरति॥ २६

तुच्छेति। श्रौतबोधेन तुच्छा कालत्रयेप्यसती यौक्तिकबोधेनानिर्वचनीया लौकिकबोधेन वास्त
वी चेत्येवं त्रिधा माया ज्ञेयेत्यर्थः॥३०॥ अस्य सत्त्वमसत्त्वं च दर्शयतीति श्रुतेरर्थमस्याः हृत्समाह
अस्येति। एकस्या एव मायाया जगत्सत्त्वासत्त्वप्रदर्शकत्वे दृष्टांतमाह। प्रसारणादिति॥३१॥ स्वतं

तुच्छानिर्वचनीया च वास्तवी चेत्यसौ त्रिधा॥ ज्ञेया माया त्रिभिर्बोधैः श्रौतयौक्तिकलौकि
कैः॥३०॥ अस्य सत्त्वमसत्त्वं च जगतो दर्शयत्यसौ॥ प्रसारणाच्च संकोचाद्यथा चित्रपटस्त
था॥३१॥ अस्वतंत्रा हि माया स्यादप्रतीतेर्विना चितिं॥ स्वतंत्रापि तथैव स्यादसंगस्यान्यथाकृतेः
॥३२॥

त्रास्वतंत्रत्वेनेति श्रुत्या मायायाः स्वातंत्र्यास्वातंत्र्ये दर्शिते। तत्रोभयत्रोपपत्तिमाह॥ अस्वतंत्रेति। स्व
भासकचैतन्यं विहाय तत्प्रकाशात् इत्यस्वतंत्रा। असंगस्यात्मनोन्यथाकरणात्स्वतंत्रापीत्यर्थः॥३२॥ ७॥

अन्यथाकरणमेव स्पष्टयति। कूटस्थासंगमिति। जीवेशावाभासेन करोतीति श्रुत्युक्तं जीवेश्वरविभागं
च करोतीत्याह। चिदाभासेति॥३३॥ नन्वात्मनोऽन्यथाकरणे कूटस्थत्वहानिः स्यादित्याशंक्याह॥ कूटस्थ
मिति॥ ननु कूटस्थत्वाविघातेन जगदादिस्वरूपत्वापादनं दुर्घटमित्याशंक्य मायाया दुर्घटैकविधायि

कूटस्थासंगमात्मानं जगत्त्वेन करोति सा॥ चिदाभासस्वरूपेण जीवेशावपि निर्ममे॥३३॥ कू
टस्थमनुपद्रुत्य करोति जगदादिकं॥ दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः॥३४॥ द्रवत्व
मुदके वह्नावौष्ण्यं काठिन्यमश्मनि॥ मायाया दुर्घटत्वं च स्वतः सिध्यति नान्यतः॥३५॥

त्वान्नेदमाश्चर्यकारणमित्याह। दुर्घटेति। अन्यथा मायात्वमेव भज्येतेति भावः॥३४॥ मायाया दुर्घट
कारित्वस्वभावत्वे दृष्टांतमाह॥ द्रवत्वमिति। उदकादीनां द्रवत्वादि यथा स्वाभाविकं तद्वन्मायाया दुर्घटका
रित्वमित्यर्थः॥३५॥ २७

ननु मायाया दुर्घटकारित्वमाश्चर्यलक्षणं न भवतीत्युक्तमनुपपन्नं लोके मायायाश्चमत्कारहेतुत्वदर्श
नादित्याशंक्य मायायाः प्रयुक्तसाक्षात्कारपर्यंतमेवास्या आश्चर्यकारणत्वं नोपरिष्टादित्याह। न वेत्तीति

न वेत्ति लोको यावत्तं साक्षात्तावच्चमत्कृतिं॥ धत्ते मनसि पश्चात्तु मायैषेत्युपशाम्यति॥३६॥
प्रसरंति हि चोद्यानि जगद्वस्तुत्ववादिषु॥ न चोदनीयं मायायां तस्याश्चोद्यैकरूपतः॥३७॥
चोद्येऽपि यदि चोद्यं स्यात्त्वच्चोद्ये चोद्यते मया॥ परिहार्यं ततश्चोद्यं न पुनः प्रतिचोद्यतां॥३८॥

॥३६॥ किंच जगत्सत्यत्ववादिनो नैयायिकादीन्प्रति ते वैविधानि चोद्यानि कर्तव्यानि न मायावादिनं
प्रतीत्याह। प्रसरंतीति॥३७॥ मायावादिनं प्रति चोद्यकरणेऽतिप्रसंगमाह॥ चोद्येऽपीति। तर्हि किं
कर्तव्यमित्यत आह। परिहार्यमिति॥३८॥ ७॥ ॥

चि॰ दी॰
२८

उक्तमेवार्थं प्रपंचयति॥ विस्मयेति॥३९॥ मायात्वनिश्चयेन तत्परिहारान्वेषणमुचितं स एव नेदानीमि
दश्यतिशंकते॥ मायात्वमिति॥ मायालक्षणसद्भावान्मायात्वं निश्चीयतामित्यभिप्रायेणाह॥ तर्हीति

विस्मयैकशरीराया मायायाश्चोद्यरूपतः॥ अन्वेष्यः परिहारोस्या बुद्धिमद्भिः प्रयत्नतः॥
॥३९॥ मायात्वमेव निश्चेयमिति चेत्तर्हि निश्चिनु॥ लोकप्रसिद्धमायाया लक्षणं यत्तदीदृ
शं॥४०॥ न निरूपयितुं शक्या विस्पष्टं भासते च या॥ सा मायेतीन्द्रजालादौ लोकाः संप्रतिपे
दिरे॥४१॥ स्पष्टं भाति जगच्चेदमशक्यं तन्निरूपणं॥ मायामयं जगत्तस्मादीक्षस्वापक्षपाततः
॥४२॥

किंलक्षणमित्यत आह॥ लोकेति॥४०॥ तस्या अपि किं लक्षणमित्यत आह॥ न निरूपयितुमिति॥४१॥
दृष्टांते सिद्धं लक्षणं दार्ष्टांतिके योजयति स्पष्टमिति॥४२॥ जगतोऽशक्यनिरूपणत्वं कथमित्याशं २८

क्य तद्दर्शयति॥ निरूपयितुमिति॥४३॥ अशक्यनिरूपणत्वमेवोदाहरणेन स्पष्टयति॥ देहेंद्रिये
ति॥४४॥ स्वभाववादी शंकते॥ वीर्यस्येति॥ सिद्धांती पृच्छति॥ कथं तदिति॥ अन्वयव्यतिरेकाभ्यां
जानामीत्याशंक्यासंभवान्मैवमित्याह॥ अन्वयेति॥४५॥ एवं पुनः पुनः पृष्टे सति किमपि न जा

निरूपयितुमारब्धे निखिलैरपि पंडितैः॥ अज्ञानं पुरतस्तेषां भाति कक्षासु कासुचित॥४३॥
देहेंद्रियादयो भावा वीर्येणोत्पादिताः कथं॥ कथं वा तत्र चैतन्यमित्युक्ते ते किमुत्तरं॥४४॥ वी
र्यस्यैष स्वभावश्चेत्कथं तद्विदितं त्वया॥ अन्वयव्यतिरेकौ यौ भग्नौ तौ वंध्यवीर्यतः॥४५॥ न
जानामि किमप्येतदित्यंते शरणं तव॥ अत एव महांतोस्य प्रवदंतींद्रजालतां॥४६॥ ७॥

नामीत्येवोत्तरं देयमिति॥ फलितमाह॥ न जानामीति॥४६॥ उक्तानिर्वचनीयत्वे वृद्धसंमतिं दर्शय

चि॰दी॰ २९

ति॥एतस्मादिति॥१४७॥न केवलं देहस्यैकस्यैव दुर्निरूपत्वं किंतु वटवृक्षादेरपीत्याह॥देहवदिति॥१४
८॥नन्वस्माभिर्निर्वक्तुमशक्यत्वेऽपि उदयनादिभिराचार्यैर्निरुच्यत इत्याशंक्याह॥निरुक्तावभिमान॰

एतस्मात्किमिवेंद्रजालमपरं यद्गर्भवासस्थितं॥रेतश्चेतति हस्तमस्तकपदप्रोद्भूतना
नांकुरं॥पर्यायेण शिशुत्वयौवनजरावेषैरनेकैर्वृतं॥पश्यत्यत्ति शृणोति जिघ्रति तथा गच्छत्य
थागच्छति॥१४७॥देहवद्वटधानादौ सुविचार्य विलोक्यतां॥क्व धाना कुत्र वा वृक्षस्तस्मान्मायेति
निश्चिनु॥१४८॥निरुक्तावभिधानं ये दधते तार्किकादयः॥हर्षमिश्रादिभिस्ते तु खंडनादौ सुशि
क्षिताः॥१४९॥अचिंत्याः खलु ये भावा न तांस्तर्केषु योजयेत्॥अचिंत्यरचनारूपं मनसापि ज
गत्खलु ५०

मिति॥१४९॥उक्तार्थे संप्रदायिकानां वाक्यं संपादयति॥अचिंत्या इति॥१५०॥ २९

ननु भवत्वेवं जगतोऽचिंत्यरचनात्वं मायायां किमायातमित्यत आह॥मायेति॥५१॥कथं तस्या जगद्बी
जत्वमित्यत आह॥जाग्रदिति॥ततः किमित्यत आह॥तस्मादिति॥यतो जगत्कारणं मायातोऽशे

अचिंत्यरचनाशक्तिबीजं मायेति निश्चिनु॥मायाबीजं तदेवैकं सुषुप्तावनुभूयते॥१५१॥जा
ग्रत्स्वप्नजगत्तत्र लीनं बीज इव द्रुमः॥तस्मादशेषजगतो वासनास्तत्र संस्थिताः॥१५२॥या
बुद्धिवासनास्तासु चैतन्यं प्रतिबिंबति॥मेघाकाशवदस्पष्टचिदाभासोऽनुमीयतां॥१५३॥

षजगद्वासनास्तत्र मायायां तिष्ठंतीत्यर्थः॥५२॥ततोऽपि किं तत्राह॥या बुद्धिवासना इति॥ननु तासु
प्रतिबिंबोऽस्ति चेत्कुतो नानुभूयत इत्याशंक्यास्पष्टत्वादित्याह॥मेघेति॥तर्हि कुतस्तत्सिद्धिरित्यत
आह॥

अनुमीयतामिति॥५३॥ ननु मेघांशोदकस्यादृष्टाकाशप्रतिबिंबत्वेपि तज्जातीयस्य घटोदकस्य दृष्टाकाशप्रतिबिंबवतः सद्भावान्मेघाकाशानुमाने घटते। इह तथाविधदृष्टांताभावात्कथमनुमानोदय इत्याशंक्यात्रापि तथाविधदृष्टांतसंपादनायाह॥ साभासमिति। चिदाभासविशिष्टं तद्वासनानां बुद्धिरूपेण परिणममानं विस्पष्टचिदाभासवद्भवतीति भावः॥ एवं चेदनुमानमत्र सूचितं भवति

साभासमेव तद्बीजं धीरूपेण प्ररोहति॥ अतो बुद्धौ चिदाभासो विस्पष्टं प्रतिभासते॥५४
मायाभासेन जीवेशौ करोतीति श्रुतौ श्रुतं॥ मेघाकाशजलाकाशाविव तौ सुव्यवस्थितौ॥५५

॥ विमता बुद्धिवासनाश्चित्प्रतिबिंबवत्यो भवितुमर्हंति बुद्ध्यवस्थाविशेषत्वात् बुद्धिवृत्तिवदिति॥५४॥ एवं जीवेश्वरयोर्मायिकत्वे श्रुतमुक्तमुपपादितमुपसंहरति। मायाभासेनेति। ननु जीवेशयोर्मायिकत्वे

समाने कथमवांतरभेदसिद्धिरित्याशंक्यास्पष्टस्पष्टोपाधिमत्त्वेन मेघाकाशजलाकाशयोरिव तत्सिद्धिरित्याह॥ मेघाकाशेति॥५५॥ ईशस्य मेघाकाशसाम्यं स्फुटीकरोति॥ मेघवदिति।५६॥ मायाप्रतिबिंबस्येश्वरत्वे किं प्रमाणमित्याशंक्य श्रुतिरेवेत्याह। मायाधीन इति। न केवलमीश्वरत्वमस्य श्रुतं

मेघवद्वर्तते माया मेघस्थिततुषारवत्॥ धीवासनाश्चिदाभासस्तुषारस्थखवत्स्थितः॥५६॥
मायाधीनश्चिदाभासः श्रुतो मायी महेश्वरः॥ अंतर्यामी च सर्वज्ञो जगद्योनिः स एव हि॥५७॥
सौषुप्तमानंदमयं प्रक्रम्यैवं श्रुतिर्जगौ॥ एष सर्वेश्वर इति सोयं वेदोक्त ईश्वरः॥५८॥

अपि त्वंतर्यामित्वादिकमपि धर्मजातं श्रुतमस्तीत्याह॥ अंतर्यामीति॥५७॥ ननु धीवासनाप्रतिबिंबस्येश्वरत्वादिकं कथं श्रुतिसिद्धमित्याशंक्य तदुपपादिकां श्रुतिं दर्शयति सौषुप्तमिति सौषुप्तस्था

णएकीभूतः प्रज्ञानघनएवेत्यादिकाश्रुतिर्धीवासनाप्रतिबिंबरूपस्यानंदमयस्येश्वरत्वादिकं प्रतिपा
दयतीत्यर्थः॥५८॥ नन्वानंदमयस्य सर्वज्ञत्वादिकमनुभवविरुद्धमित्याशंक्याह॥ सर्वज्ञत्वादिके
इति॥ कुतइत्यत आह॥ श्रौतेति॥ इतोपि न विप्रतिपत्तिः कार्येत्याह॥ मायायामिति॥ ५९॥ नन्वनंतकृ

सर्वज्ञत्वादिके तस्य नैव विप्रतिपद्यतां॥ श्रौतार्थस्यावितर्क्यत्वान्मायायां सर्वसंभवात्॥ ५९॥
अयं यत्सृजते विश्वं तदन्यथयितुं पुमान्॥ न कोपि शक्तस्तेनायं सर्वेश्वर इतिस्मृतः॥ ६०॥

त्वपुत्रप्रभावे श्रुतिरपि यावज्ञाववाक्यवदर्थवादः स्यादित्याशंक्य श्रुतिप्रामाण्यसिद्धये सर्वेश्वरत्वादि
कमुपपादयति॥ अयमिति॥ अयमानंदमयो यज्जाग्रदादिविश्वं सृजति तन्न केनाप्यन्यथाकर्तुं शक्
यतेऽतोयं सर्वेश्वर इत्यर्थः॥ ६०॥ ७॥ ३१

इदानीं सर्वज्ञत्वमुपपादयति॥ अशेषेति॥ तत्र सौषुप्तेऽज्ञाने कारणभूते कार्यभूतानां सर्वप्राणिबु
द्धीनां वासना निवसंति ताभिश्च वासनाभिः सर्वं जगत्क्रोडीकृतं विषयीकृतं तेन सर्वबुद्धिवास

अशेषप्राणिबुद्धीनां वासनास्तत्र संस्थिताः॥ ताभिः क्रोडीकृतं सर्वं तेन सर्वज्ञ ईरितः॥
॥६१॥ वासनानां परोक्षत्वात्सर्वज्ञत्वं न हीक्ष्यते॥ सर्वबुद्धिषु तद्दृष्ट्वा वासनास्वनुमीयतां
॥६२॥

नावदज्ञानोपाधिकत्वेन सर्वज्ञ उच्यत इत्यर्थः॥६१॥ ननु यदि सर्वज्ञत्वमस्ति तर्हि तत्कुतो नानुभू
यत इत्याशंक्य तदुपाधीनां वासनानां परोक्षत्वान्नानुभव इत्याह॥ वासनानामिति॥ कथं तर्हि तदव
गम इत्याशंक्याह॥ सर्वबुद्धिष्विति॥ सर्वबुद्धिनिष्ठं सर्वज्ञत्वं स्वकारणभूतवासनागतसर्वज्ञत्वपुरःस

रंभवितुमर्हति कार्यनिष्ठधर्मविशेषत्वात्पटगतरूपादिवदित्यर्थः ॥ ६२ ॥ सर्वज्ञत्वमुपपाद्यैवांतर्या
मीति श्रुत्युक्तमंतर्यामित्वमुपपादयति ॥ विज्ञानमयेति ॥ अत्र पृथिव्यादौ तिष्ठन्नम्मयतियन्तस्ते

विज्ञानमयमुख्येषु कोशेष्वन्यत्र चैव हि ॥ अंतस्तिष्ठन्यमयति तेनांतर्यामितां व्रजेत् ॥ ६३ ॥
बुद्धौ तिष्ठन्नांतरोऽस्या धियाऽनीक्ष्यश्च धीवपुः ॥ धीयमंतर्यमयतीत्येवं वेदेन घोषितं ॥ ६४ ॥
तंतुः पटे स्थितो यद्वदुपादानतया तथा ॥ सर्वोपादानरूपत्वात्सर्वत्रायमवस्थितः ॥ ६५ ॥

नेत्यन्वयः ॥ ६३ ॥ अस्मिन्नर्थेंतर्यामिब्राह्मणं श्रुतित्वेन प्रमाणमिति दर्शयितुं तदेकदेशमन्तर्यो विज्ञा
नेति इत्यादिवाक्यमर्थतोऽनुक्रामति ॥ बुद्धाविति ॥ ६४ ॥ इदानीमंतर्यामिब्राह्मणस्य श्रुतिपर्या
यव्याख्याने ग्रंथबाहुल्यभयाद्व्याख्यानस्य सर्वपर्यायसंचारित्वसिद्धये यः सर्वेषु भूतेषु तिष्ठन्निति पर्यायंव्या ३२

चक्षाणो यः सर्वेषु भूतेषु तिष्ठन्नित्यस्यार्थं संक्षेपतमाह ॥ तंतुः पट इति ॥ ६५ ॥ ननूपादानतया सर्वत्राय
मवस्थितश्चेत्किमिति सर्वत्र नोपलभ्यत इत्याशंक्य सर्वांतरत्वादित्याह ॥ परादपीति ॥ अत्रेदमनुमा
नं ॥ अंतरत्वतारतम्यं क्वचिद्विश्रांतं तारतम्यत्वाद्गुणत्वतारतम्यवदिति ॥ ६६ ॥ ननु तोतरत्वेऽप्यंश्वादिवदं

परादप्यांतरस्तंतुस्तंतोरप्यंशुरांतरः ॥ आंतरत्वस्य विश्रांतिर्यत्रासाववनुमीयतां ॥ ६६ ॥ द्विरंत
रत्वकक्षाणां दृष्टेर्निष्प्रपंचमांतरः ॥ न वीक्ष्यते ततो युक्तिश्रुतिभ्यामेव निर्णयः ॥ ६७ ॥ पररूपेण
संस्थानात्सदस्तोतार्वपुर्यथा ॥ सर्वरूपेण संस्थानात्सर्वमस्य वपुस्तथा ॥ ६८ ॥

तर्यामिणो दर्शनं किं
नस्यादित्याशंक्य तेषामिव वास्तवाभावान्न दृश्यत इत्यभिप्रायेणाह ॥ द्विरंतरत्वेति कुतस्तर्हि तन्निर्णय
इत्यत आह ॥ नत इति ॥ अचेतनस्य चेतनाधिष्ठानमंतरेण प्रवृत्त्यनुपपत्तिर्युक्तिः श्रुतिस्तूदाहृतैव ॥ ६७

वि॰टी॰
३३

यस्य सर्वाणि भूतानि शरीरमित्यस्यार्थमाह॥ पररूपेणेति। पररूपेणावस्थितस्य तंतोः पटः शरी
रं यथा एवं सर्वरूपेणावस्थितस्य सर्वं शरीरमित्यर्थः॥६८॥ यः सर्वाणि भूतान्यंतरो यमयतीति वा
क्यस्य तात्पर्यं सदृष्टांतमाह। श्लोकद्वयेन। तंतोरिति। तंतुः संकोचादिना पटसंकोचादिर्यथा भवति

तंतोः संकोचविस्तारचलनादौ पटस्तथा॥ अवश्यमेव भवति न स्वातंत्र्यं पटे मनाक्॥६९॥
तथांतर्यामिणं यस्य यथावासनया यथा॥ विक्रियेत तथाऽवश्यं भवत्येव न संशयः॥७०॥ ईश्व
रः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति॥ भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया॥७१॥ व

एवं पृथिव्यादिरुपादानत्वेन स्थितोंतर्यामी यथा यथावासनया यथा घटादिकार्यरूपेण विक्रिय
ते तथा तत्र कार्यजातं तथा तथाऽवश्यं भवतीति भावः॥६९।७०॥ एवमंतर्यामिप्रतिपादिकां श्रु
तिमुपन्यस्य स्मृतिमप्युपन्यस्यति। ईश्वर इति॥७१॥ सर्वभूतानामिति पदस्यार्थमाह। सर्वभूता ३३
नीति॥

ते च हृदयपुंडरीके स्थिताः। ननु तेषां कुतो हृदयेऽवस्थानमित्याशंक्य हृदि अंतर्यामिणो विज्ञानमयाकारेण
परिणामादित्याह॥ तदुपादेनेति॥७२॥ यंत्रारूढानीत्यत्र यंत्रारोहशब्दयोरर्थमाह। देहादीति। भ्रामयन्निति

सर्वभूतानि विज्ञानमयास्ते हृदये स्थिताः॥ तदुपादानभूते ज्ञास्तत्र विक्रियते खलु॥७२॥ देहा
दिर्विज्ञ रे यंत्रं तदारोहोऽभिमानिता॥ विहितप्रतिषिद्धेषु प्रवृत्तिर्भ्रमणं भवेत्॥७३॥ विज्ञानम
यरूपेण तत्प्रवृत्तिस्वरूपतः॥ स्वशक्त्येशो विक्रियते मायया भ्रामणं हि तत्॥७४॥ अंतर्यम
यती स्वुक्तोऽयमेवार्थः श्रुतौ श्रुतः॥ पृथिव्यादिषु सर्वत्र मायोऽयं योऽन्यतोऽखिला॥७५॥ ॥

तिपदेचल

स्यर्थमाह। विहितेति॥७३॥ इदानीं णिच्प्रत्ययमाया पदयोरर्थमाह॥ विज्ञानमयेति॥७४॥ श्रौतस्य
यमयतीति पदस्याप्ययमेवार्थ इत्याह। अंतर्यमयतीति। उक्तव्याख्याने पर्यायांतरेष्वतिदिशति॥

पृथिव्यादिष्विति॥७५॥ प्रवृत्तिर्ज्ञातस्य सर्वेश्वराधीनत्वे वचनांतरमुदाहरति॥ जानामि धर्ममिति॥
७६॥ ननु प्रवर्त्तेरीश्वराधीनत्वे पुरुषप्रयत्नो व्यर्थः स्यादित्याशंक्य पुरुषप्रयत्नस्यापीश्वररूपत्वान्मै
वमिति परिहरति॥ नार्थ इति॥ अर्थः प्रयोजनं पुरुषकारः पुरुषप्रयत्नः॥७७॥ ननु पुरुषप्रयत्नस्या

जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः॥ केनापि देवेन हृदि स्थितेन यथा
नियुक्तोस्मि तथा करोमि॥७६॥ नार्थः पुरुषकारेण सेवं माशंक्यतां पतः॥ ईशः पुरुषकार
स्वरूपेणापि विवर्त्तते॥७७॥ ईदृग्बोधेनेश्वरस्य प्रवृत्तिर्नैव वार्यतां॥ तथापीशस्य बोधेन स्वा
त्मासंगत्वधीजनि॥७८॥ ॥

पीश्वररूपत्वेपमपति॥ भ्रामयतीति पातितपादितमंतर्यामिप्रेर
णेत्यर्थः स्यादित्याशंक्य तद्बोधेन स्वात्मासंगत्वज्ञानजन्मफलस्य सत्वान्मैवमिति परिहरति॥
ईदृगिति॥ ईदृग्बोधेनेशस्य पुरुषकारादिरूपेण व्यवस्थानज्ञानेन प्रवृत्तिः अंतर्यामिरूपेण प्रेरणा ३४
७८

आत्मनोऽसंगत्वज्ञानेनापि किं प्रयोजनमित्यत आह॥ तावतेति॥ श्रुतिस्मृत्युदितस्यानतिलंघनीय
त्वे स्मृतिं दर्शयति॥ श्रुतिस्मृती इति॥७९॥ श्रुत्यापीश्वरस्य भीतिहेतुत्वमुक्तमित्याह॥ आज्ञाया
रति॥ ईश्वरस्य भीतिहेतुत्वे किमर्थमुक्तमित्याशंक्य सर्वेश्वरत्वस्यांतर्यामित्वतः॥ पार्थक्यासिद्ध

तावतात्मुक्तिरित्याहुः श्रुतयः स्मृतयस्तथा॥ श्रुतिस्मृती ममैवाज्ञे इत्यपीश्वरभाषितं॥
७९॥ आज्ञाया भीतिहेतुत्वं भीषास्मादिति हि श्रुतं॥ सर्वेश्वरत्वमेतत्स्यादंतर्यामित्वतः पृ
थक्॥८०॥ एतस्य वा अक्षरस्य प्रशासन इति श्रुतिः॥ अंतः प्रविष्टः शास्ता ऽयं जनानामिति
च श्रुतिः ८१

यइत्यमत्वाह॥ सर्वेश्वरत्वमिति॥८०॥ बहिरंतश्चेश्वर एव नियामक इत्यत्र श्रुतिद्वयमा
हाएतस्य वा इति॥८१॥ क्रमप्राप्तस्यैव योनिरित्यस्यार्थमाह॥ जगद्योनिरिति॥ प्रतिज्ञातार्थे प्रभवाप्य

चि·दी·
३५

थः॥ यो हि भक्तानां मृतिवारणं हेतुत्वेन योजयते॥ प्रभवेति॥ प्रभवाप्ययावुत्पत्तिप्रलयौ तत्कर्तृत्वा
ज्जगद्योनिरित्यर्थः॥ उत्पत्तिप्रलयशब्दाभ्यां विवक्षितमर्थमाह॥ आविर्भावेति॥ उत्पत्तिप्रल
यावाविर्भावतिरोभावौ मताविति योजना॥ ८२॥ आविर्भावकारित्वं सदृष्टान्तमुपपादयति॥ आ

जगद्योनिर्भवेदेष प्रभवाप्ययकृत्त्वतः॥ आविर्भावतिरोभावावुत्पत्तिप्रलयौ मतौ
॥८२॥ आविर्भावयति स्वस्मिन्विलीनं सकलं जगत्॥ प्राणिकर्मवशादेष पटो यद्वत्प्रसारि
तः॥८३॥ पुनस्तिरोभावयति स्वात्मन्येवाखिलं जगत्॥ प्राणिकर्मक्षयवशात्संकोचितपटो
यथा॥८४

विर्भावयतीति॥ यथा संकुचितश्चित्रपटः स्वस्य प्रसारणेन स्वनिष्ठानि चित्राण्याविर्भावयति एवमी
शोऽपीत्यर्थः॥८३॥ तस्यैव प्रलयकारणत्वं दर्शयति॥ पुनरिति॥ स एव पटः संकुचितश्चित्राणि ३५

८४

यथा तिरोभावयति तद्वदित्यर्थः॥ आविर्भावतिरोभावयोर्दृष्टान्तान्तराणि दर्शयति॥ रात्रिघस्राविति
द्यास्वापोऽहः॥८५॥ नन्वीश्वरस्य जगद्योनित्वं किमारंभकत्वेन किं वा तदाकारपरिणामित्वेन नाद्यः॥ अ
द्वितीयस्यारंभकत्वायोगात् न द्वितीयः निरवयवस्य परिणामासंभवादित्याशंक्य विवर्तवादा

रात्रिघस्रौ सुप्तिबोधावुन्मीलननिमीलने॥ तूष्णीभावमनोराज्ये इव सृष्टिलयाविमौ॥
८५॥ आविर्भावतिरोभावशक्तिमत्त्वेन हेतुना॥ आरंभपरिणामादिचोद्यानां नात्र संभ
वः॥८६॥ अचेतनानां हेतुः स्याज्जाड्यांशेनेश्वरस्तथा॥ चिदाभासांशतस्त्वेष जीवानां कारणं
भवेत्॥८७॥

श्रयणान्नायं दोष इति परिहरति॥ आविर्भावेति॥ ॥८६॥ नन्वेक एवेश्वरः कथं चेतनाचेतनजगदुपा
दानं भविष्यतीत्याशंक्योपाधिप्राधान्येनाचेतनोपादानं चित्प्राधान्येन चेतनोपादानं च भविष्यतीत्या
ह॥

वि॰ दी॰ ३६

अचेतनानामिति ॥८७॥ ननु मायाविन ईश्वरस्य जगत्कारणत्वप्रतिपादनमनुपपन्नं सुरेश्वराचा-
र्यैः परमात्मन एव तदभिधानादिति शंकते ॥ तमःप्रधान इति । तमःप्रधानस्तमोगुणप्रधानमा^

तमःप्रधानः क्षेत्राणां चित्प्रधानश्चिदात्मनां ॥ परः कारणतामेति भावनाज्ञानकर्मभिः
॥८८॥ इति वार्त्तिककारेणाज्ञचेतनहेतुता ॥ परमात्मन एवोक्ता नेश्वरस्येति चेन्न तत् ॥
॥८९॥ अन्योन्याध्यासमत्रापि जीवकूटस्थयोरिव ॥ ईश्वरब्रह्मणोः सिद्धं कृत्वा ब्रूते सुरेश्वरः ९०

योपाधिकः क्षेत्राणां शरीरादीनां भावनाज्ञानकर्मभिः भावनासंस्काराज्ञानं देवताध्यानादि
कर्म पुण्यापुण्यलक्षणं तैर्निमित्तभूतैरित्यर्थः ॥८८॥८९॥ त्वंपदार्थ इव तत्पदार्थेऽप्युपाधिष्ठानारोप-
योरन्योन्याध्यासस्याविवक्षितत्वान्मैवमिति परिहरति नेति न तत् अन्योन्याध्यासमिति ॥९०॥ ७ ॥ ॥ ३६

ननु सुरेश्वराचार्यैरीश्वरब्रह्मणोरन्योन्याध्यासः सिद्धवत्कृत्य व्यवहृत इति कुतोऽवगम्यत इत्याशं-
क्य श्रुत्यर्थपर्यालोचनवशादिति दर्शयितुं श्रुतिमर्थतः ॥ पठति सत्यमिति भवत्येषा श्रुतिर-
न्यथा कथमन्योन्याध्यासावगतिरित्यत आह ॥ आपातेति । तत्र तस्यां श्रुतौ सत्यादिलक्षण^

सत्यं ज्ञानमनन्तं यद्ब्रह्म तस्मात्समुत्थिताः ॥ खं वाय्वग्निजलोर्व्योषध्यन्नदेहा इति श्रुतिः ॥
॥९१॥ आपाततो हि तेऽस्त्यत्र ब्रह्मणो भाति हेतुता ॥ हेतोश्च सत्यता तस्मादन्योन्याध्यास इष्य-
ते ॥९२॥ अन्योन्याध्यासरूपोऽसावन्नलिप्तपटो यथा ॥ घट्टितेनैकतामेति तद्भ्रान्त्यैक-
तां गतः ॥९३॥

स्य निर्गुणस्य ब्रह्मणो जगत्कारणत्वे जगत्कारणस्य मायाधीनचिदाभासस्य च सत्य-
त्वमापाततः प्रतीयमानोऽन्योन्याध्यासमन्तरेण न घटत इति भावः ॥९२॥ एवमन्योन्याध्याससिद्धौ

श्वरब्रह्मणोरेकत्वं पूर्वोक्तोदाहृतं घटितं तद्दृष्टांतस्मारणेन द्रढयति। असोमेति॥१५३॥ अन्योन्यैक
त्वापत्तौ दृष्टांतमभिधायापातदर्शिनां भेदाप्रतीतौ पूर्वोक्तमेव दृष्टांतांतरं दर्शयति। मेघाकाशेति
। ऐक्यं पश्यंति न भेदमिति स्पष्टार्थः॥१५४॥ कुतस्तर्हि ब्रह्मेशयोर्भेदावगतिरित्यत आह। उपक्रमादिभि

मेघाकाशमहाकाशौ विविच्येते न पामरैः। तद्वद्ब्रह्मेशयोरैक्यं पश्यंत्यापातदर्शिनः॥१५४॥
उपक्रमादिभिर्लिंगैस्तात्पर्यस्य विचारणात्। असंगं ब्रह्म मायावी सृजत्येष महेश्वरः॥१५५॥
सत्यं ज्ञानमनंतं चेत्युपक्रम्योपसंहृतं। यतो वाचो निवर्तंत इत्यसंगत्वनिर्णयः॥१५६॥ व ॥॥

रिति। उपक्रमोपसंहारावभ्यासोऽपूर्वता फलं। अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये इत्युक्तैः षड्विधै
र्लिंगैः श्रुतितात्पर्यावधारणे सति ब्रह्मासंगं मायाविस्रष्टेश्वरश्च गम्यत इति शेषः॥१५५॥ श्रुतावुपक्रमो ३७

पसंहारैकरूपप्रदर्शनेनोक्तं ब्रह्मणोऽसंगत्वं स्पष्टयति। सत्यमिति। अतोऽसंगत्वनिर्णयो भवतीति शे
षः॥१५६॥ मायाविन ईश्वरस्य स्रष्टृत्वप्रतिपादिकां श्रुतिमर्थतो दर्शयति॥ मायीति। अस्मान्मायी सृ
जते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्ध इति श्रुतिरीश्वरस्य स्रष्टृत्वं जीवस्य तत्र जगति बद्धत्वं

मायी सृजति विश्वं तं निरुद्धस्तत्र मायया। अन्य इत्यपरा ब्रूते श्रुतिस्तेनेश्वरः सृजेत्॥१५७॥
आनंदमय ईशोऽयं बहु स्यामित्यवैक्षत। हिरण्यगर्भरूपोऽभूत्सुप्तिः स्वप्नो यथा भवेत्॥१५८॥

दर्शयतीत्यर्थः॥१५७॥ एवमानंदमयस्येश्वरस्य जगत्कारणत्वं प्रतिपाद्य तस्माज्जगदुत्पत्तिप्रका
रमाह॥ आनंदमय इति। ईक्षित्वा च हिरण्यगर्भरूपोऽभूदित्यन्वयः। तत्र दृष्टांतमाह। सुप्तिरिति।
॥१५८॥ तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादौ क्रमेण युगपद्वा यथाश्रुति ज्ञेयेति योजना।

चि॰ दी॰
३८

सृष्टिश्चवृणादिहंसर्वमसृजतेतियुगपद्वर्णिताचकस्योपादेयत्वेकस्यवाहेयत्वमित्याकांक्षायांश्रु
तियुक्त्युपेतत्वादुभयंग्राह्यमित्याह॥क्रमेणेति॥एषाजगत्सृष्टिर्द्विविधश्रुतिसद्भावात्क्रमेणयुगप
द्वायथाश्रुतिज्ञेयेतियोजना॥तत्रोपपत्तिर्द्विविधस्वप्नदर्शनादिति॥लोकेक्रमसृष्टस्यचाक्रम

क्रमेणयुगपद्वैषासृष्टिर्ज्ञेयायथायथाश्रुति॥द्विविधश्रुतिसद्भावाद्द्विविधस्वप्नदर्शनात्॥१९९॥
सूत्रात्मासूक्ष्मदेहाख्यःसर्वजीवघनात्मकः॥सर्वाहंमानधारित्वात्क्रियाज्ञानादिशक्तिमान्
२००

सृष्टस्यचस्वप्नपदार्थजातस्यदर्शनादितिभावः॥१९९॥हिरण्यगर्भस्यस्वरूपंनिरूपयति॥सू
त्रात्मेति॥सूत्रात्मापरेसूत्रमिवजगत्स्वनुस्यूतत्वात्सूत्रात्मास्वरूपंयस्यसूक्ष्मदेहइत्याख्यायस्यसतथा
विधःसर्वजीवघनात्मकःसर्वेषांजीवानांलिंगशरीरोपाधिकानांघनात्मकःसमष्टिरूपःतत्रहेतुः ३८

सर्वाहंमानेति॥सर्वेषुव्यष्टिलिंगशरीरेष्वहमभिमानवत्त्वादितिभावः॥२००॥इच्छाज्ञानक्रियाशक्ति
मोऽस्यहिरण्यगर्भावस्थापन्नंजगत्स्वनीतोदृष्टान्तमाह॥प्रत्युषइति॥प्रत्युषउषःकालः॥२१॥एवंलोक

प्रत्यूषेवाप्रदोषेवामग्नोमंदेतमस्ययं॥लोकोभातियथातद्वदस्पष्टंजगदीक्ष्यते॥२०१॥
सर्वतोलांछितोमष्यायथास्याद्घट्टितःपटः॥सूक्ष्माकारैस्तथेशस्यवपुःसर्वत्रलांछि
तं॥२०२॥

प्रमितदृष्टान्तमभिधाययथाधौतइतिपूर्वोक्तश्लोकेभिहितंलांछितंपटंदृष्टान्तयति॥सर्वतइति
॥यथाघट्टितःपटोमषीमयैराकारविशेषैर्लांछितोभवतितथामायिनईश्वरस्यवपुरपंचीकृ
तभूतकार्यैर्लिंगशरीरैर्लांछितमित्यर्थः॥२०२॥ व ॥

बुध्यारोहाय वैभवादृष्टांतांतरमाह॥ सर्प्यं वेति।३॥ एवं सूत्रात्मस्वरूपं विशदीकृत्य तस्यैवावस्थाभेदरूपं
वीरूतकार्यभूतकार्योपाधिकं विराजं दृष्टांतत्रयेण विशदयति॥ आतपेति। सूर्योदयानंतरमात
पेन प्रकाशितो लोकः आतपाभात लोकः॥४॥ तत्संज्ञा वे प्रमाणमाह॥ विश्वरूपेति। विश्वरूपाध्या

सर्प्यं वा शाकजातं वा सर्वतोंकुरितं यथा॥ कोमलं तद्वदेवैष पेलवो जगदंकुरः॥३॥ आतपा
भातलोको वा पटो वा वर्णपूरितः॥ सर्प्यं वा फलितं यद्वत्तथास्पष्टवपुर्विराट्॥४॥ विश्वरूपा
ध्याय एषऊरुः सूक्तेपि पौरुषे॥ धात्रादिस्तंबपर्यंतानेतस्यावयवान्विदुः॥५॥

याहीकीह्यप्रमुदितमित्यत्राको ब्रह्मादिस्तंबपर्यंतं जगद्रूपं मुदितमित्याह॥५॥ एतावता प्रक्र
ते किमायातमित्यत आह ईशेत्यंतर्यामि प्रभृति कुद्दालकादिपर्यंतं वस्तुजातं प्रत्येकमीश्वरत्वेन प्रसिद्धता
मित्याह॥ ३८

ईशेत्यादिना श्लोकत्रयेण॥६।७।८॥ नन्वेवं यथायथोपासनेन देवं भवतीति श्रुतिस्तत्र तत्तज्जातस्तत्तत्फल
संज्ञा वे प्रमाणमित्याह॥ यथायथेति॥ ननु सर्वेषामीश्वरत्वे फलवैषम्यं कुत इत्यत आह सप्रमाणानामधि

ईशसूत्रविराड्वेधो विष्णुरुद्रेंद्रवह्नयः॥ विघ्नभैरवमैरालमारीकायक्षराक्षसाः॥६॥ विप्रक्षत्रि
यविट्शूद्रा गवाश्वमृगपक्षिणः॥ अश्वत्थवटचूताद्या यवव्रीहितृणादयः॥७॥ जलपाषा
णमृत्काष्ठवास्याकुद्दालकादयः॥ ईश्वराः सर्व एवैते पूजिताः फलदायिनः॥८॥ यथायथो
पासते तं फलमीयुस्तथा तथा॥ फलोत्कर्षापकर्षौ तु पूज्यपूजानुसारतः॥९॥ मुक्तिस्तु ब्र
ह्मतत्त्वस्य ज्ञानादेव न चान्यथा॥

स्थानानां पूजानामर्चादीनां च सात्विकादिभेदेन वैषम्यमित्या
ह॥ फलोत्कर्षेति॥९॥ सांसारिकफलसिद्धिरेवं भवतु मुक्तिः कस्योपासनाद्भवतीत्याशंक्य स्तानयति

रेकेणकेनापिभवतीत्याह॥मुक्तिरिति॥तत्रदृष्टांतमाह॥स्वप्नबोधमिति॥स्वजागरणमंतरेण॥
स्वनिद्राकल्पितस्वप्नोयथाननिवर्त्ततेतथाब्रह्मतत्त्वज्ञानमंतरेणतदज्ञानकल्पितस्संसं
सारोननिवर्त्ततइतिभावः॥१०॥ननुद्वैतनिवृत्तिलक्षणायामुक्तेःस्वप्नदृष्टांतेनतत्त्वबोधसा

स्वप्नबोधंविनानैवस्वस्वप्नोहीयतेयथा॥१०॥अद्वितीयब्रह्मतत्त्वेस्वप्नोयमखिलं
जगत्॥ईशजीवादिरूपेणचेतनाचेतनात्मकं॥११॥ ॥

ध्यत्वाभिधानमनुपपन्नंनिवर्त्त्यस्यद्वैतस्यस्वप्नतुल्यत्वाभावादित्याशंक्यास्यमायाग्रहणरूपत्वेन
स्वप्नतुल्यत्वमस्त्येवचयमेतत्सुषुप्तंस्वप्नंजाग्रत्तुमायामात्रमितिश्रुत्याभिहितत्वान्नैवमि
त्याह॥अद्वितीयेति॥ईशजीवादिरूपेणवर्त्तमानंचेतनाचेतनात्मकंयदखिलंजगदस्यायम

द्वितीयब्रह्मतत्त्वेस्वप्नइतियोजना॥११॥नन्वीशजीवयोर्ब्रह्माभिन्नयोःकथंजगदंतःपातित्वमित्याशं
क्यतयोर्मायाकल्पितत्वेनजगदंतःपातित्वमित्याह॥आनंदमयेति॥१२॥ताभ्यांसर्वंप्रकल्पितमित्यु
क्तंतत्रकेनकियत्कल्पितमित्याकांक्षायामाह॥ईक्षणादीति॥सईक्षतलोकान्नुसृजाइत्यादिकया

आनंदमयविज्ञानमयावीश्वरजीवकौ॥माययाकल्पितावेतौताभ्यांसर्वंप्रकल्पितं॥१२॥
ईक्षणादिप्रवेशांतासृष्टिरीशेनकल्पिता॥जाग्रदादिविमोक्षांतःसंसारोजीवकल्पितः॥
॥१३॥अद्वितीयंब्रह्मतत्त्वमसंगंतन्नजानते॥जीवेशयोर्मायिकयोर्वृथैवकलहंययुः॥१४॥

एतयाद्वाराप्रापद्यतेत्येतयाश्रुत्याप्रतिपादितासृष्टिरीश्वरकर्तृकातस्यत्रयआवसथाइत्यादिक
याएतमेवपुरुषंब्रह्मततममपश्यदित्यंतयाप्रतिपादितःसंसारोजीवकर्तृकइत्यर्थः॥१३॥ छ॥

चि.दी.
४१

ननु ईशजीवादिरूपेण चेतनाचेतनात्मकब्रह्मण एव पारमार्थिकत्वे वादिनां जीवेश्वरतत्त्व
विषया विप्रतिपत्तिः कुत इत्याशंक्य भ्रान्तिसिद्धत्वज्ञानमूलत्वादित्याह॥ अद्वितीयमिती
॥२४॥ जीवेश्वरविषया या वादिविप्रतिपत्तिः सा ज्ञानमूलत्वेन यथाविधं तत्त्वं न बोधनीया इत्याशंक्य दृष्ट्या

ज्ञात्वा सदा तत्त्वनिष्ठाननुमोदामहे वयं॥ अनुशोचाम एवान्यान्न भ्रान्तैर्विवदामहे॥२५॥
तृणार्चनादियोगान्ता ईश्वरे भ्रान्तिमाश्रिताः॥ लोकायतादिसांख्यान्ता जीवे विभ्रान्तिमाश्रि
ताः॥२६॥ अद्वितीयब्रह्मतत्त्वं न जानन्ति यदा तदा॥ भ्रान्ता एवाखिलास्तेषां क्व मुक्तिः क्वेह
वा सुखं॥२७॥

भ्रमत्वान्नेत्याह॥ ज्ञात्वेति॥२५॥ ईश्वरे जीवे च भ्रान्त्या विप्रतिपन्नान्वादिनो विभज्य दर्श
यति॥ तृणार्चकादीति॥२६॥ कुतो भ्रान्तत्वं तेषामित्यत आह॥ अद्वितीयेति॥ ततः किं तत्राह॥ तेषा ४१

मिति॥ परिगृहीतपक्षप्रतिपादनाभिनिवेशेन चित्तविश्रान्त्यभावान्नैहिकमपि सुखं तेषामित्याह
॥ क्वेह वा सुखमिति॥२७॥ ननु तेषां ब्रह्मविद्याभावेऽपीतरविद्याप्रयुक्त उत्तमाधमभावो दृश्यतेऽत
उत्तमत्वप्रयुक्तं सुखं केषांचिदस्त्यादित्याशंक्य तस्य मुमुक्षुभिरनादरणीयत्वं दृष्टान्तेनाह॥ उत्तमा

उत्तमाधमभावश्चेत्तेषां स्यादस्तु तेन किं॥ स्वप्नस्थराज्यभिक्षाभ्यां न बुद्धः स्पृश्यते खलु॥
॥२८॥ तस्मान्मुमुक्षुभिर्नैव मतिर्जीवेशवादयोः॥ कार्या किंतु ब्रह्मतत्त्वं विचार्य बुध्यतां च
तत्॥२९॥

धमेति॥२८॥ जीवेश्वरवादयोर्मुक्तिहेतुत्वाभावान्मुमुक्षुभिस्तत्र मतिर्निवेशनीयेत्यु
पसंहरति॥ तस्मादिति॥ तर्हि किं कर्तव्यमित्याशंक्य श्रुतिविचारेण ब्रह्मबोध एव कर्तव्य इत्याह॥ किं
त्विति॥२९॥ ननु ब्रह्मतत्त्वनिश्चयाय तयोः स्वरूपं हेयत्वेन ज्ञातव्यमित्याशंक्य तथात्वे जीवेशवा

द्वयोरेव बुद्धिर्न परिसमापनीयेत्याह॥ पूर्वपक्षतयेति। एतावता पूर्वपक्षतया तत्त्वनिर्णयहेतुत्व
संभवेन तयोर्जीवेशवादयोरवशो विवेकज्ञानशून्यो न निमज्जस्वेति योजना॥२०॥ ननु सांख्ययो

पूर्वपक्षतयातौ चेत्तत्त्वनिश्चयहेतुतां॥ प्राप्नुतोऽस्तु निमज्जस्व तयोर्नैतावताऽवशः॥
॥२२०॥ असंगचिद्विभुर्जीवः सांख्योक्तस्तादृगीश्वरः॥ योगोक्तस्तत्त्वमोरर्थौ शुद्धौ ताविति
चेच्छृणु॥२२१॥ न तत्त्वमोरुभावर्थावस्मत्सिद्धांततां गतौ॥ अद्वैतबोधनायैव सा कक्षा
विदिष्यते॥२२॥

गशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेनुभवबुद्धिरप्युपादेयत्वान्न तयोः पूर्व
पक्षत्वमिति शंकते। असंगचिदिति। सांख्ययोगशास्त्रोक्तयोर्जीवेशयोः शुद्धचिद्रूपत्वेपि तयो
र्वास्तवभेदस्य तैरंगीकारान्नायमस्मत्सिद्धांत इत्याह॥ शृण्विति॥२१॥ तत्त्वंपदयोरुभावर्थावस्म। ४२

त्सिद्धांतत्वं न गताविति योजना॥ ननु रूपस्य ब्रह्मशास्त्रेऽप्यंशुद्धेन त्वंपदार्थौ भवद्भिरपि भिन्नौ निरूपितावि
त्याशंक्याह। अद्वैतबोधनायैवेति। लोकप्रसिद्धभेदनिरासद्वारा तदैक्यप्रतिपादनायैव तौ भेदेनानू
दितौ न तु तयोर्भेदः प्रतिपाद्यत इति भावः॥२२॥ तर्हि पदार्थशोधनं किमर्थमित्यत आह। अनादीति॥

अनादिमायया भ्रांता जीवेशौ सुविलक्षणौ॥ मन्यंते तद्व्युदासाय केवलं शोधनं तयोः॥२३॥
अत एवात्र दृष्टांतो योग्यः प्राक्सम्यगीरितः॥ घटाकाशमहाकाशजलाकाशाभ्रखात्मकः
॥२४॥

अत्र मायाशब्देन स्वाश्रयव्यामोहिकाऽविद्या लक्ष्यते तया विपरीतज्ञानं प्राप्ताः कर्तृत्वादिमत्त्वं जीव
स्य सर्वज्ञत्वादिगुणयोगित्वं चेश्वरस्य पारमार्थिकं मन्यंते तन्निरासार्थमेव शोधनं क्रियत इत्यर्थः
॥२३॥ पदार्थशोधनप्रकारमेव हि दर्शयितुमुपायत्वेन पूर्वोक्तं दृष्टांतं स्मारयति। अत एवेति। यतः पदा
र्थशोधनं कर्तव्यमत एवेत्यर्थः॥२४॥

चि.दी. ४३

पदार्थशोधनप्रकारमाह। जलाम्बेति। ये जलाकाशाम्बरवे ते जलाम्बरोपाध्यधीनत्वात् पारमार्थिके तयोरा
धारभूतौ घटाकाशमहाकाशौ सुनिर्मलौ जलाद्युपाधिनिरपेक्षाकाशमात्ररूपाविसर्थः॥२५॥ दार्ष्टा
न्तिकमाह। एवमिति॥२६॥ ननु पदार्थद्वयशोधनकल्पोपयोगित्वेनापि सांख्ययोगमतद्वयमंगी

जलाम्बरोपाध्यधीने ते जलाकाशाम्बरे तयोः॥ आधारौ तु घटाकाशमहाकाशौ सुनिर्मलौ॥
॥२५॥ एवमानन्दविज्ञानमयौ मायाधियोर्वशौ॥ तदधिष्ठानकूटस्थब्रह्मणी तु सुनिर्मले॥
२६॥ एतत्कल्पोपयोगेन सांख्ययोगौ मतौ यदि॥ देहोऽन्नमयकोशत्वादात्मत्वेनाभ्युपेयतां॥२७॥

कार्यमिति चेदसत्यमिदमुच्यते॥ इतरेषामपि शास्त्राणां तत्कल्पोपयोगित्वेनास्माभिरभ्युपेयत्वादि
त्याह॥२७॥ कुतस्तर्हि सांख्ययोगयोर्वेदांतविरोधित्वमित्याशंक्य जीवभेदजगत्सत्यत्वेश्वरताट ४३

स्थ्यलक्षणांशत्रयात्याह॥ आत्मभेद इति॥२८॥ ननु जीवस्यासंगत्वज्ञानादेव मुक्तिसिद्धेः किमद्वैतबोधे
नेत्याशंक्याद्वैतज्ञानमंतरेणासंगत्वादिकं न संभाव्यत इत्यभिसंधिं हृदि निधायोत्तरमाह। जीव

आत्मभेदो जगत्सत्यमीशोऽन्य इति चेत्त्रयं॥ त्यज्यते तैस्तदा सांख्ययोगवेदांतसंमतिः
॥२८॥ जीवोऽसंगत्वमात्रेण कृतार्थ इति चेत्तदा॥ स्रक्चंदनादिनित्यत्वमात्रेणापि कृता
र्थता॥२९॥ यथा स्रगादिनित्यत्वं दुःसंपादं तथात्मनः॥ असंगत्वं न संभाव्यं जीवतोर्जग
दीशयो॥३०॥

इति॥२९॥ अभिसंधिमाविःकरोति॥ यथेति॥३०॥ असंभवमेव स्पष्टयति
॥ अवश्यमिति। फलितमाह। कोऽपेति। संगनियमनयोरविवेककार्यत्वाद्विवेकज्ञानेन चाविवेक
३१

निवृत्तौकुतःपुनःसंगाप्रसक्तिरितिशंकते।अविवेकेति।एवंसत्यपसिद्धांतापातइतिपरिहरति॥
बंधादिनी।अयंभावः।अविवेकोनामकिंविवेकाभावःकिंवातदन्यःउतनतद्विरोधीनाद्यःअभाव-
मात्रस्यभावकार्यजनकत्वायोगात्नद्वितीयःविवेकादन्यस्यघटादेःसंगहेतुत्वादर्शनात्नतृतीयस्तु

अविवेकःप्रकृतिःसंगंपुरेवापादयेत्तथा॥नियच्छत्येतमीशोपिकोस्यमोक्षस्तथासति॥३१॥अ-
विवेककृतःसंगोनियमश्चेतिचेत्तदा॥बलादापतितोमायावादःसांख्यस्यदुर्मतेः॥३२॥बं-
धमोक्षव्यवस्थार्थमात्मनानात्वमिष्यतां॥इतिचेन्नयतोमायाव्यवस्थापयितुंक्षमा॥३३॥

तस्यभावरूपात्वात्तानत्वमेवेतिमायावादप्रसंगइति॥३२॥अद्वैताभ्युपगमेबंधमोक्षव्यवस्थानुपप-
त्तेरात्मभेदोंगीकर्तव्यइतिचोदयति।बंधमोक्षेति।एकस्याप्यात्मनोमाययाबंधमोक्षव्यवस्थोपपत्ते-

र्नैवमितिपरिहरति।नयतइति॥३३॥मायापिकथंव्यवस्थापयेदित्याशंक्यतस्मादुर्घटकारित्वस्वाभाव्या-
दित्याह।दुर्घटमिति।बंधस्याविद्यकत्वेपिमोक्षोवास्तवोस्तुपेतव्यइत्याशंक्यश्रुतिविरोधान्नैवमित्या-
ह।वास्तवाविति।नसहतेतरामतितरांनैवसहतइत्यर्थः।बंधमिवमोक्षमपिवास्तवंनसहतइति

दुर्घटंघटयामीतिविरुद्धंकिंनपश्यति॥वास्तवौबंधमोक्षौतुश्रुतिर्नसहतेतरां॥३४॥नवि-
रोधोनचोत्पत्तिर्नबद्धोनचसाधकः॥नमुमुक्षुर्नवैमुक्तइत्येषापरमार्थता॥३५॥ ब ॥

भावः॥३४॥मोक्षादेर्वास्तवत्वप्रतिषेधिकांश्रुतिंपठति।नविरोधइति॥निरोधोनाशःउत्पत्तिर्देहसं-
बंधः।बंधःसुखदुःखादिधर्मवान्साधकःश्रवणाद्यनुष्ठातामुमुक्षुःसाधनचतुष्टयसंपन्नःमुक्तः
निवृत्ताविद्यःइत्येतत्सर्वंवस्तुतोनास्तीत्यर्थः॥३५॥ ब ॥

एवंजीवेश्वरादिभेदस्य मायामयत्वमुपपादितमुपसंहरति॥ मायाख्या इति॥३६॥ ननुजीवेश्वरयो
र्मायिकत्वेन तद्भेदस्य मिथ्यात्वेपि कूटस्थब्रह्मणोः पारमार्थिकत्वेन तद्भेदोपि पारमार्थिकः स्यादित्या
शंक्य भेदप्रयोजकस्य स्वरूपवैलक्षण्यस्याभावान्मैवमिति परिहरति॥ कूटस्थेति। नाममात्राद्भेद

मायाख्यायाः कामधेनोर्वत्सौ जीवेश्वरावुभौ॥ यथेच्छं पिबतां द्वैतं तत्त्वं त्वद्वैतमेवहि॥३६॥
कूटस्थब्रह्मणोर्भेदो नाममात्रादृते नहि॥ घटाकाशमहाकाशौ वियुज्येते नहि क्वचित्॥३७॥
यदद्वैतं श्रुतं सृष्टेः प्राक्तदेवाद्य चोपरि॥ मुक्तावपि वृथा माया भ्रामयत्यखिलाञ्जनान्॥३८॥

प्रतीतावपि वस्तुतो भेदाभावे दृष्टांतं पूर्वोक्तं स्मारयति॥ घटाकाशेति॥३७॥ एवं भेदस्य मिथ्यात्व
समर्थनेन किं फलमित्यत आह॥ यदद्वैतमिति॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमि

तिश्रुतौ यदद्वितीयं ब्रह्म प्रतिपादितं तदेव कालत्रयेप्यबाध्यत्वेन वास्तवं न भेद इति भावः॥ कुतस्तर्हि
सर्वैर्भेदेऽभिनिवेशः क्रियत इत्यत आह॥ वृथामायेति॥ तत्त्वज्ञानरहितत्वादभिनिवेशं कुर्वंतीति भावः
३८॥ ननु प्रपंचस्य मायामयत्वं तत्त्वस्याद्वितीयत्वं च ये वर्णयंति तेपि संसरंतो दृश्यंतेऽतस्तत्त्वज्ञाने

येवदंतीत्थमेतेपि भ्राम्यंतेविद्ययात्र किं॥ न यथा पूर्वमेतेषामत्र भ्रांतेरदर्शनात्॥२३९॥
ऐहिकामुष्मिकः सर्वः संसारो वास्तवस्ततः॥ न भाति नास्ति चाद्वैतमित्यज्ञानिविनिश्चयः॥४०॥

न किं प्रयोजनमिति शंकते॥ येवदंतीति॥ कर्मवशाल्लोकव्यवहारे सत्यपि पूर्ववदभिनिवेशाभावा
न्मैवमिति परिहरति॥ न यथेति॥३९॥ ज्ञानिनां भ्रांत्यभावं दर्शयितुमज्ञानिनां निश्चयं तावदाह॥ ऐहि
केति॥ इहलोके भव ऐहिकः पुत्रकलत्रादिपोषणरूपः अमुष्मिन्परलोके भव आमुष्मिकः स्वर्गसुखा
द्यनुभवरूपः॥४०

चि॰दी॰ ४६ न त्वज्ञानिनिश्चयस्य न तो वैलक्षण्यं दर्शयति। ज्ञानिनामिति। अद्वैतं पारमार्थिकं भाति च संसारस्तु पारमा
र्थिक इति निश्चय इत्यर्थः॥ ततः किमित्याशंक्य स्वस्वनिश्चयानुसारेण फलं भवतीत्याह॥ स्वस्वेति॥ ४२
अद्वैतं भातीत्युक्तिः शास्त्रेणैव नानुभवतोऽतो न तन्निश्चय इति शंकते॥ नाद्वैतमिति॥ अनुभवाभा

ज्ञानिनां विपरीतोऽस्माद्विनिश्चयः सम्यगीक्ष्यते॥ स्वस्वनिश्चयतो बद्धो मुक्तोऽहं वेति मन्यते॥
४२॥ नाद्वैतमपरोक्षं चेन्न चिद्रूपेण भासनात्॥ अशेषेण न भातं चेद्द्वैतं किं भासतेऽखिलं
॥४२॥

चरत्वमसिद्धमिति परिहरति॥ न चिद्रूपेणेति॥ घटः स्फुरति पटः स्फुरतीति घटादिष्वनुस्यूतस्फुर
णभानादित्यर्थः॥ ननु चिद्रूपत्वस्य भानेऽपि तत्कार्त्स्न्येन न प्रतीयत इति शंकते॥ अशेषेणेति॥ साकल्ये
न भानाभावो द्वैतेऽपि समान इत्याह॥ द्वैतं किमिति॥ ४२॥ एवं दोषसाम्यमभिधाय परिहारसाम्यमाह॥ ४६

दिङ्मात्रेणेति॥ दिङ्मात्रेणैकदेशेन द्वयोर्द्वैताद्वैतयोरित्यर्थः॥ एतावता कथं परिहारसाम्यमित्याशंक्या
ह॥ द्वैतसिद्धिवदिति॥ तेन तव पक्षे तावता एकदेशप्रतीतिसद्भावेन द्वैतसिद्धिवद्द्वैतनिश्चय इवाद्वैत
सिद्धिरद्वैतनिश्चयोऽपि न किं भवति किं भवत्येवेत्यर्थः॥ ४३॥ पूर्ववादी प्रकारांतरेणाद्वैतासिद्धिं शं

दिङ्मात्रेण विभानं तु द्वयोरपि समं खलु॥ द्वैतसिद्धिवदद्वैतसिद्धिस्ते तावता न किं॥ ४३॥
द्वैतेन हीनमद्वैतं द्वैतज्ञाने कथं त्विदं॥ चिद्भानं त्वविरोध्यस्य द्वैतस्यातोऽसमे उभे॥ ४४॥ ए
वं तर्हि शृणु द्वैतमसन्मायामयत्वतः॥

कते॥ द्वैतेनेति॥ अद्वैतं द्वैतरहितं तु तयोः परस्परविरोधात्त्र
यासति द्वैतप्रतीतावद्वैतं न संभवतीत्यर्थः॥ ननु तर्हि द्वैतस्याप्यद्वैतविरोधित्वादद्वैते प्रतिभास
मानेऽद्वैतस्यासिद्धिरिति चोद्यं समानमित्याशंक्याह पूर्ववादी॥ चिद्भानं त्विति॥ भवन्मते चिद्रूपप्रतीतेर

वाद्वैतप्रतीतित्वात्तस्याश्चाद्वैतविरोधित्वाभावात्तयोः साम्यमिति भावः॥४४॥ प्रतीयमानस्यापि द्वैतस्य वास्तवत्वाभावाच्च वास्तवाद्वैतविघातित्वमिति परिहरति सिद्धांती। एवमिति। प्रसक्तप्रतिषेधेऽन्यत्राप्रसंगाच्छिष्यमाणे संप्रत्ययः परिशेषः॥४५॥ परिशेषप्रकारमेव दर्शयति। अचिंत्येति।

तेन वास्तवमद्वैतं परिशेषाद्विभासते॥४५॥ अचिंत्यरचनारूपं मायैव सकलं जगत्॥ इ
ति निश्चित्य वस्तुत्वमद्वैते परिशेष्यतां॥४६॥ पुनर्द्वैतस्य वस्तुत्वं भाति चेत्त्वं तथा पुनः॥ प
रिशीलय को वात्र प्रयासस्तेन ते वद॥४७॥

न चिंत्या अचिंत्या रचना रूपं यस्य तत्तथाविधं सकलं जगन्मायैव मिथ्यैवेत्यनेन प्रकारेणानिर्वचनीयत्वान्मिथ्यात्वं द्वैतस्य निश्चित्य वास्तवमद्वैतं परिशेष्यतामित्यर्थः॥२४६॥ नन्वेवमद्वैतनिश्चये कृतेऽपि पुनःपुनर्द्वैतसत्यत्वं पुनरेव वासनया भा ४७

तीत्याशंक्य तन्निवृत्तये पुनःपुनर्मिथ्यात्वं विचारयेदित्याह। पुनर्द्वैतस्येति॥ आवृत्तिरसकृदुपदेशादिति चतुर्थाध्याये व्यासेन श्रवणाद्यावर्तनस्य विहितत्वादिति भावः॥२४७॥ कियंतं कालमित्थं विचारणीयमित्याशंक्य तत्त्वापरोक्षविद्यातो विचारोऽयं समाप्यत इति विचारकालावधेरुक्तत्वाद्वा द्वैतविचारेऽयं खेदो युक्तः किंतु द्वैतप्रतिभास एवमयुक्त इत्याह। कियंतमिति॥४८॥ नन्वेवम

कियंतं कालमिति चेत्खेदोऽयं द्वैत इष्यतां॥ अद्वैते तु न युक्तोऽयं सर्वानर्थनिवारणात्॥४८॥

द्वैतात्मतत्त्वापरोक्षज्ञानवत्यपि मयि क्षुत्पिपासाद्यनर्थस्य परिदृश्यमानत्वादनर्थनिवारकत्वमात्मज्ञानस्यासिद्धमिति शंकते॥ क्षुत्पिपासादय इति। किं मच्छब्दवाच्योऽहंकारे दृश्यंते उत मच्छब्दोपलक्षिते चिदात्मनीति विकल्प्याद्यमंगीकरोति॥ मच्छब्दवाच्य इति। न द्वितीयः तस्याऽसंगत्वादविष

यत्वाच्चेतिबहिरेवद्रष्टव्यं॥४९॥वस्तुनस्तत्त्वतीत्यभावेपिभ्रांत्यातत्रसक्तिःस्यादितिशंकते॥
चिद्रूपेपीति॥एवंतर्हिनर्यहितोरध्यासस्यनिवृत्तयेसदाविवेकःक्रियतामित्याह॥माध्यासमिति॥
॥५०॥अनादिवासनावशात्पुनःपुनरध्यासागमनेतन्निवृत्तयेविवेकएवावर्तनीयोनोपायांतरमि

क्षुत्पिपासादयोदृष्टायथापूर्वंमयीतिचेत्॥मच्छब्दवाच्येऽहंकारेदृश्यंतांनेतिकोवदेत्॥
॥४९॥चिद्रूपेपिप्रसज्येरंस्तादात्म्याध्यासतोयदि॥माध्यासंकुरुकिंतुत्वंविवेकंकुरुसर्वदा
॥५०॥झटित्यध्यासआयातिदृढवासनयेतिचेत्॥आवर्तयेद्विवेकंचदृढंवासयितुंसदा॥५१

त्याह॥झटितीति॥५१॥ननुविचारेणद्वैतस्यमायामयत्वंयुक्त्यैवसिध्यतिनानुभवतइत्याशंक्या
चिंत्यरचनात्वलक्षणमिथ्यात्वानुभवस्यस्वसाक्षिकत्वान्मैवमितिपरिहरति॥विवेकइति॥५२॥ ४८

नन्वचिंत्यरचनात्वंमिथ्यापदार्थलक्षणमुक्तंचिदात्मन्यतिव्याप्तमितिशंकते॥चिदपीति॥प्रागभावयु
क्तत्वेसत्यचिंत्यरचनात्वंमिथ्यात्वलक्षणमितिविवक्षुरचिंत्यरचनात्वमात्मनोंगीकरोति॥नसीत्ति॥

विवेकेद्वैतमिथ्यात्वंयुक्त्यैवेतिनभण्यतां॥अचिंत्यरचनात्वस्यानुभूतिर्हिस्वसाक्षिकी॥५२॥
चिदप्यचिंत्यरचनायदितर्ह्यस्तुनोवयं॥चितिंस्मचिंत्यरचनांब्रूमोनित्यत्वकारणात्॥५३॥

ति॥एवमंगीकारेऽपसिद्धांतइत्याशंक्यपरिहरति॥नोवयमिति॥तत्रहेतुमाह॥नित्यत्वेति॥वयंचि
तिमचिंत्यरचनांनोब्रूमइतियोजना॥५३॥चितेर्निमित्तत्वंकुतइत्याशंक्यप्रागभावानुभवाभावादि
त्याह॥प्रागभावइति॥यतश्चितेःप्रागभावोनानुभूतस्ततोनित्येतियोजना॥इदमत्राकूतं॥चि
तेःप्रागभावोस्तीतिवदन्प्रष्टव्यःचित्प्रागभावःकिंचितानुभूयतेउतान्येनानाद्येनतस्यजडत्वेना
ने

चि·दी·
४८

नुभवितृत्वानुपपत्तेः।चितानुभूयतइत्यपिपक्षेकिंचिदंतरेणोतस्वेनैव।नाद्यः।अद्वैतवादेचिदंतरं
स्यैवाभावात्।तत्स्वीकारेपिचित्त्वतियोगिकस्याभावस्यचिद्ग्रहणमंतरेणग्रहीतुमशक्यत्वात्तस्या
अपिग्रहणमाणत्वेघटादिवदचित्त्वापत्तेः।नापिद्वितीयः।स्वाभावस्यस्वेनग्रहीतुमशक्यत्वादिति।।न

प्रागभावोनानुभूतःचितेर्नित्याततश्चितिः।।द्वैतस्यप्रागभावस्तुचैतन्येनानुभूयते।।
।।५३।।

तुद्वैतस्यप्रमात्रादिभेदभावस्यचतेनैवानुभवितुमशक्यत्वात्तदनुभवित्रंतराभावाच्चचैतन्यवद्द्वे
तद्वैतस्यापिनित्यत्वापत्तिरित्याशंक्यानुभवित्रंतराभावोऽसिद्धइतिपरिहरति।।द्वैतस्येति।जाग्रदा
दिद्वैताभावस्यसुषुप्तौसाक्षिणाऽनुभूयमानत्वात्तस्यसः।साक्षीसर्वस्यसाक्षीतिश्रुतेरितिभावः ४८
।।५३।।

एवंप्रागभावयुतत्वेसत्यचित्त्वरचनात्वस्यमिथ्यात्वलक्षणस्यसद्भावाद्द्वैतमिथ्यात्वंसिद्धमि
त्याह।प्रागभावेति।प्रागभावयुतमिति।हेतुगर्भितंविशेषणंद्वैतंप्रागभावयुतत्वाद्घटादिव
द्रच्यतेहितथापिरच्यमानत्वेपितस्यद्वैतस्यरचनाऽचित्त्वात्तेनरच्यमानत्वेसत्यचित्त्वरचनात्वेनें

प्रागभावयुतंद्वैतंरच्यतेहिघटादिवत्।।तथापिरचनाऽचित्त्वान्मिथ्यातेनेंद्रजालवत्
।।२५५।।चित्प्रत्यक्षाततोन्यस्यमिथ्यात्वंचानुभूयते।।नाद्वैतमपरोक्षंचेन्नैतन्नव्याहतंव
चः।।२५६।।

द्रजालवदितींद्रजालिकप्रासादवन्मिथ्येत्यर्थः।।५५।।चितिस्तावत्स्वप्रकाशत्वेननित्या
परोक्षावभासते।।चिद्व्यतिरिक्तस्यचमिथ्यात्वंतयैवचितानुभूयतइतिदर्शितं।एवंचसत्यद्वैतस्या
परोक्ष्यंनास्तीतिवदतोव्याघातस्तस्यादित्याह।।चित्प्रत्यक्षेति।चिद्रूपेणभासमानादित्यभिहितयुक्तिसमु

द्वयार्थश्च शङ्कः ॥ अद्वैतमपरोक्षं चेत्स्वेतत्कथं नव्याहतं चेति योजना ॥५६॥ एवं वेदान्तार्थं जानतामपि
पुरुषाणां केषांचिदत्र विश्वासः कुतो न जायत इति पृच्छति इत्थमिति । सम्यग्विचारस्यासत्त्वादिति चेदस्य वि
प्रतीबन्धं गृह्णाति । चार्वाकादेरिति । आदिशब्देन पामरा गृह्यन्ते ॥५७॥ प्रबुद्धस्योहापोहकुशलस्य

इत्थं ज्ञात्वाप्यसंतुष्टाः केचित्कुत इतीर्यताम् ॥ चार्वाकादेः प्रबुद्धस्याप्यात्मा देहः कुतो वद ॥५७॥
सम्यग्विचारो नास्त्यस्य धीदोषादिति चेत्तथा ॥ असंतुष्टास्तु शास्त्रार्थं न त्वैक्षन्त विशेषतः ॥५८॥

प्रतीबन्धमोचनं शंकते । सम्यगिति । साम्येन समाधत्ते तथेति । धीदोषादसंतुष्यन्ते तु शास्त्रे एवं शा
स्त्रार्थः ॥५८॥ इत्थं तत्त्वविचारपर्यन्तं जन्मतत्त्वज्ञानफलं विचारयितुं तत्प्रतिपादिकां श्रुतिं पठति । यदे
ति । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुत इत्यस्य मंत्रस्योत्तरार्धं । अस्य मुमुक्षोर्हृदि श्रिता ये ५०

कामास्तादात्म्याध्यासमूला इच्छादयः संति ते सर्वे यदा यस्मिन्काले प्रमुच्यंते तत्त्वज्ञानेनाध्यास
निवृत्तौ निवर्तन्ते अथ तदानीमेव मर्त्यः पूर्वं देहतादात्म्याध्यासेन मरणशीलः पुरुषः अमृतः अ
ध्यासाभावेन तद्रहितो भवति । तत्र हेतुमाह । अत्र ब्रह्म समश्नुत इति । अत्रास्मिन्नेव देहे ब्रह्म सम

यदा सर्वे प्रमुच्यंते कामा येऽस्य हृदि श्रिताः ॥ इति श्रौतं फलं दृष्टं नेति चेद्दृष्टमेव तत् ॥५९॥

श्नादि जस्तसंग समश्नुते सम्यक्प्राप्नोतीत्यस्याः श्रुतेरर्थः ॥ श्रुत्या प्रतिपादितं फलं कामनिवृत्त्यादि
लक्षणं नानुभवसिद्धं किं तु शास्त्रैकसमधिगम्यमेवेति शंकते ॥ इति श्रौतमिति । समनंतरश्रुतिवाक्यतात्पर्या
लोचनया तस्य दृष्टत्वसिद्धिमभिप्रायेण परिहरति । दृष्टमेवेति ॥५९॥ ७॥ ॥

नसूद्दृत्वस्फुटीकरणाय तद्वाक्यमुदाहृत्य तस्यार्थमाह। यदा सर्व इति। अनेन वाक्यशेषेण का
मप्रमोकस्य ग्रंथिभेदत्वेन व्याख्यातत्वाद्ग्रंथिभेदस्य चाहंकारचिदात्मनोस्तादात्म्याध्यासनिवृत्ति
लक्षणस्यानुभवसिद्धत्वात्तावन्मात्रं मुक्तेति भावः। वाक्यशेषतइत्यनेन वाक्येनेत्यर्थः॥६०॥ ननु लोके

यदा सर्वे प्रभिद्यंते हृदयग्रंथयस्त्विति॥ कामा ग्रंथिस्वरूपेण व्याख्याता वाक्यशेषतः॥
६०॥ अहंकारचिदात्मानावेकीकृत्याविवेकतः॥ इदं मे स्यादिदं मे स्यादितिच्छाः कामशब्दिताः॥
॥६१॥

कामशब्देनेच्छाभेद एवोच्यते ऽतः कथं तस्य ग्रंथित्वेन व्याख्यानमित्याशंक्याध्यासमूलस्ये
च्छाविशेषस्य कामशब्दवाच्यत्वं नेच्छामात्रस्येत्याह॥ अहंकारेति॥६१॥ नन्वध्यासमूलस्यैव का
मस्य त्याज्यत्वे सतीतरो ऽप्युपेतव्यः स्यादित्याशंक्याबाधकत्वादस्युपेय एवेत्याह। अप्रवेश्येति॥

अहंकारे चिदात्मानमप्रवेश्य तादात्म्याध्यासेनानंतर्भाव्येत्यर्थः॥६२॥ नन्वध्यासाभावे कामानाम
नुदय एव स्यादित्याशंक्यारब्धकर्मवशात्तेषामुत्पत्तिः संभविष्यतीत्याह॥ ग्रंथिभेदेपीति। तच्च द

अप्रवेश्य चिदात्मानं पृथक्पश्यन्नहंकृतिं॥ इच्छंस्तु कोटिवस्तूनि न बाधो ग्रंथिभेदतः
॥६२॥ ग्रंथिभेदेपि संभाव्या इच्छाः प्रारब्धदोषतः॥ बुद्ध्वापि पापबाहुल्यादसंतोषो यथात
व॥६३॥ अहंकारगतेच्छाद्यैर्देहव्याध्यादिभिस्तथा॥ वृक्षादिजन्मनाशैर्वा चिद्रूपात्मनि किं भ
वेत्॥६४॥

ष्टांतमाह। बुद्ध्वापीति॥६३॥ अध्यासाभावे ऽहंकारगतेच्छादेरबाधकत्वे दृष्टांतं हृदय पूर्व
र्शनेन विशदयति। अहंकारेति। यथा देहगतव्याध्यादिभिरहंकारसाक्षिणो बाधो नास्ति देहसंबं
धरहितत्वात्तथा वृक्षादिगतैर्जन्मादिभिरेवमध्यासनिवृत्तावहंकारगतेच्छादिभिरपीति भावः॥
॥६४॥

चि.दी.
५२

चिद्रात्मनोऽसंगत्वस्यैकरूपत्वात्सर्वमपि कामादिबाधो नास्तीति शंकते ॥ ग्रंथिभेदादिति ॥ एवंवि
धबोधस्यैव ग्रंथिभेदत्वेनास्माभिरभिधीयमानत्वादिदं चोद्यमस्मदनुकूलमित्याह ॥ तन्न विस्म
रेति ॥६५॥ एवंविधज्ञानाभावएव ग्रंथिरित्याह ॥ नैवमिति ॥ ननु ज्ञानिनोपीच्छाद्युपगमे ज्ञानस्य

ग्रंथिभेदात्पुराप्येवमिति चेत्तन्न विस्मर ॥ अयमेव ग्रंथिभेदस्तव तेन कृती भवान् ॥६५॥
नैवं जानंति मूढाश्चेत्सोयं ग्रंथिर्न चापरः ॥ ग्रंथितद्भेदमात्रेण वैषम्यं मूढबुद्धयोः ॥६६॥
प्रवृत्तौ वा निवृत्तौ वा देहेंद्रियमनोधियां ॥ न किंचिदपि वैषम्यमस्त्यज्ञानिविबुद्धयोः
॥६७॥

ज्ञानिनोः कुतो वैलक्षण्यमित्याशंक्य ग्रंथिभेदाभेदातिरेकेण न कुतोपीत्याह ॥ ग्रंथितद्भेदेति
॥६६॥ कारणांतराभावमेव विशदयति ॥ प्रवृत्ताविति ॥६७॥ ब ॥ ५२

उक्तार्थे दृष्टान्तमाह ॥ भ्रान्त्येति ॥६८॥ ज्ञानिनो ग्रंथिभंगत्वे गीतावाक्यं प्रमाणयति ॥ न द्वेष्टीति ॥ सं
प्रवृत्तानि ध्यानानि दुःखानि न द्वेष्टि निवृत्तानि सुखानि न कांक्षति उदासीनवद्वर्तते इत्यर्थः ॥ ग्रंथि
भिदा ग्रंथिभेदः ॥६९॥ इदं वाक्यमौदासीन्यविधिपरं न तु ग्रंथिभेदे प्रमाणमिति शंकते ॥ औ

भ्रान्तश्रोत्रिययोर्वेदपाठापाठकृता भिदा ॥ नाहाराद्यावस्ति भेदः सोयं न्यायोऽत्र योज्यतां ॥६८॥
न द्वेष्टि संप्रवृत्तानि न निवृत्तानि कांक्षति ॥ उदासीनवदासीन इति ग्रंथिभिदोच्यते ॥६९॥ औदा
सीन्यं विधेयं चेद्वच्छब्दव्यर्थता तदा ॥ न शक्ता अस्य देहाद्या इति चेद्रोग एव सः ॥७०॥ ब ॥

दासीन्यमिति ॥ विधिपरत्वे वच्छब्दो व्यर्थः स्यादिति परिहरति ॥ वच्छब्देति ॥ ज्ञानिदेहादेरकार्यक्षमत्वा
त्प्रवृत्तिर्न तु ग्रंथिभेदादित्याशंक्योपहसति ॥ न शक्ता इति ॥७०॥ ॥

भवत्तुकोदोषस्तत्राह। तत्त्वबोधमिति। दुःशकमसाध्यमित्यर्थः॥७१॥ नन्वस्यानेपरिहासोऽयंज्ञानि
नांप्रहत्यभवभास्यपुराणांसिद्धत्वादितिशंकते। भरतादेरिति। श्रुतिमज्ञानानुष्ठा[illegible]यतीतिपरिह
रति॥ जक्षदितिजक्षन्क्रीडन्रममाणः स्त्रीभिर्वायानैर्वाज्ञातिभिर्वावयस्यैर्वानोपजनंस्मरन्निदं

तत्त्वबोधंन्नृपव्याधिंममंतेयेमहाधियः॥ तेषांप्रज्ञातिविश्वासात्किंतेषांदुःशकंवद
॥७१॥ भरतादेरप्रवृत्तिःपुराणोक्तेतिचेन्नहि॥ जक्षन्क्रीडन्रतिंविंदन्नित्यश्रौषीर्नकि
श्रुतिं॥७२॥

शरीरमितिश्रौतंवाक्यंनाश्रौषीरित्यर्थः॥ जक्षन्भक्षयन्जक्षभक्षहसनयोरितिधा
तुः क्रीडन्स्वेच्छयाविहरन्रममाणः स्त्र्यादिभिर्नोपजनंस्मरन्निदंशरीरमितिपुत्रजनंजनानांसमी
पेवर्त्तमानमिदंस्वशरीरंनस्मरन्नानुसंदधानइत्यर्थः॥ श्लोकेरतिंविंदन्नितिश्रौतस्यरममाणइ
तिपदस्यव्याख्यानं॥७२॥

ननुतर्हिपुराणस्यकागतिरित्याशंक्यपुराणमप्यौदासीन्यबोधनपरंनप्रवृत्तभावपरमितिमभि
प्रेत्याह॥ नत्वाहारादीति॥७३॥ संगोपिकृतस्त्याज्यइत्यतआह॥ संगीहीति॥७४॥ ननुतर्हिमान

नत्वाहारादिसंत्यागान्नरतादिःस्थितःक्वचित्॥ काष्ठपाषाणवत्किंतुसंगभीताउदासते॥७३॥
संगीहिबाध्यतेलोकैर्निःसंगःसुखमश्नुते॥ तेनसंगःपरित्याज्यःसर्वदासुखमिच्छता॥७४॥
अस्तात्वाशास्त्रहृदयंमत्तोवश्यस्पृहामथा॥ सर्वाणिनिर्णयस्त्वास्तामस्मृत्तिसिद्धांतउच्यते॥
॥७५॥ वैराग्यबोधोपरमाःसहायास्तेपरस्परं॥ प्रायेणसहवर्त्तंतेवियुज्यंतेक्वचित्क्वचित्
॥७६

ससंगस्यैवसाक्षात्वेऽतःसंगस्त्यागानोवदिव्यवहरतामनंतादिकंज्ञनैःकथमुच्यतइत्याशंक्य
शास्त्रतात्पर्यज्ञानस्यमत्वादिमाह। श्रुत्वेति। ज्ञानोमद्व्यवहारोनात्रविचारणीयइत्याह। सर्वाणि

मिति। तर्हि किमनुसंधेयमित्याकांक्षायां शास्त्रहृद्यमित्याह। अस्मत्सिद्धांत इति॥७५॥ कोशाविस्त
त आह। वैराग्येति॥७६॥ वैराग्यादीनामन्योन्यापरिहारेणावस्थानदर्शनाद्भेदाशंकायां तद्धेत्वादी
नां भेदाद्भेदोऽवगंतव्य इत्याह। हेतुस्वरूपेति। तत्र वैराग्यस्य हेत्वादित्रयं दर्शयति। दोषदृष्टिरिति॥७८॥

हेतुस्वरूपकार्याणि भिन्नान्येषामसंकरः॥ यथावदवगंतव्यः शास्त्रार्थं प्रविविंचता॥७७॥ दो
षदृष्टिर्जिहासा च पुनर्भोगेष्वदीनता॥ असाधारणहेत्वाद्या वैराग्यस्य त्रयोऽप्यमी॥७८॥ श्रव
णादित्रयं तद्वत्तत्त्वमिथ्याविवेचनं॥ पुनर्ग्रंथेरनुदयो बोधस्यैते त्रयो मताः॥७९॥

इदानीं तत्त्व
बोधस्य कारणादीनि दर्शयति। श्रवणादीति। आदिशब्देन मनननिदिध्यासने गृह्येते॥ आत्मा वा अरे
द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यात्मदर्शनसाधनत्वेन श्रवणादिविधानाच्छ्रवणादेर्ज्ञानहे ५४
तुत्वं तत्त्वमिथ्याविवेचनं स्वरूपमस्याहंकारादेरभेददर्शनं। ग्रंथेरनुदयोऽस्मोमाप्यामानुमक्तिः॥७९॥

उपरतेस्तानि दर्शयति। यमादिरिति। आदिशब्देन नियमादयो गृह्यंते॥ धीनिरोधश्चित्तवृत्तिनिरोध
लक्षणो योगः॥८०॥ किमेतेषां समप्राधान्यमुत नेत्याशंक्याह। तत्त्वबोध इति। तमेव विदित्वाऽतिमृत्यु
मेति नान्यः पंथा विद्यतेऽयनायेति श्रुतेरिति भावः॥ इतरयोस्तदुपकारित्वे ब्राह्मणो निर्वेदमायान्नास्त्य

यमादिर्धीनिरोधश्च व्यवहारस्य संक्षयः॥ स्फुटं हेत्वाद्या उपरतेरित्यसंकर ईरितः॥८०॥
तत्त्वबोधः प्रधानं स्यात्साक्षान्मोक्षप्रदत्वतः॥ बोधोपकारिणावेतौ वैराग्योपरमावुभौ
॥८१॥

कृतः कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्ये
वात्मानं पश्येदिति श्रुतिभ्यामवगम्यते॥८२॥ प्रायेण सह वर्तंते वियुज्यंते क्वचित्क्वचिदित्युक्तं॥

चि.दी.
५५

तत्र कारणमाह । अयोपीति । अनेकजन्मार्जितपुण्यपुंजपरिपाकेन प्राणिनां सहसा बोधो भवति । अन्यथा तु प्रतिबंधकपापानुसारेण पुरुषविशेषे कालविशेषेण कस्यचित्प्रतिबंधो भवतीति भावः ॥८१॥ तत्रापि तत्त्वज्ञानप्रतिबंधे मोक्षो नास्तीत्याह । वैराग्येति । तर्हि वैराग्यादिसंपादनं निःफलम्

अयोग्यस्यं तपश्चाश्चेन्महत्तस्य यमः फलं ॥ दुरितेन क्वचित्किंचित्कदाचित्प्रतिबध्यते ॥
॥८२॥ वैराग्योपरती पूर्णे बोधस्तु प्रतिबध्यते ॥ यस्य तस्य न मोक्षोऽस्ति पुण्यलोकस्तपो
बलात् ॥८३॥

मित्याशंक्याह । प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः । शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायत इति भगवद्वचनात्पुण्यलोकप्राप्तिर्भवतीत्याह । पुण्यलोकस्तपोबलादिति ॥८३॥ वैराग्योपरतोऽस्तु प्रतिबंधे जीवन्मुक्तिसुखं न सिध्यतीत्याह । पूर्णे बोध इति ॥८४॥ इदानीं ५५

वैराग्यादीनामवधिं दर्शयति । ब्रह्मलोकेति ॥८५॥ अवांतरतारतम्यं स्वबुद्ध्या निश्चेयमित्याह । दिशेति ॥८६॥ ननु तत्त्वबोधवतामपि रागादिमत्त्वेन वैषम्योपलंभात्तज्ज्ञानस्यापि मुक्तिहेतु-

पूर्णे बोधे तदन्यौ द्वौ प्रतिबद्धौ यदा तदा ॥ मोक्षो विनिश्चितः किंतु दृष्टदुःखं न नश्यति ॥२८४॥
ब्रह्मलोकतृणीकारो वैराग्यस्यावधिर्मतः ॥ देहात्मवत्परात्मत्वदार्ढ्ये बोधः समाप्यते ॥
॥२८५॥ सुप्तिवद्विस्मृतिः सीमा भवेदुपरमस्य हि ॥ दिशानया विनिश्चेयं तारतम्यमवान्तरं ॥२८६
आरब्धकर्मनानात्वाद्बुद्धानामन्यथान्यथा ॥ वर्तनं तेन शास्त्रार्थे भ्रमितव्यं न पण्डितैः ॥२८७॥

त्वं न निश्चेतुं शक्यत इत्याशंक्य रागद्वेषाध्यादिवदारब्धकर्मफलत्वान्मुक्तिप्रतिबंधकत्वमसिद्धमतो न शास्त्रार्थे विप्रतिपत्तव्यमित्याह । आरब्धकर्मनानात्वादिति ॥२८७॥ ॥ ॥ ॥

किंतर्हि द्वितिपत्रव्यमित्यत आह। स्वस्वेति। सर्वेषां ब्रह्माहमस्मीतिज्ञानमेकाकारं निरवद्यब्रह्मस्वरू
पेणावस्थानं च समानमिति भावः॥२८८॥ प्रकरणस्यास्य तात्पर्यं संक्षिप्य दर्शयति॥ जगदिति॥२

स्वस्वकर्मानुसारेण वर्त्तंतां ते यथा तथा॥ अविशिष्टः सर्वबोधः समा मुक्तिरिति स्थितिः
॥२८८॥ जगच्चित्रं स्वचैतन्ये पटे चित्रमिवाऽर्पितं॥ मायया तदुपेक्ष्यैव चैतन्ये परिशेष्यतां
॥२८९॥ चित्रदीपमिमं नित्यं येऽनुसंदधते बुधाः॥ पश्यंतोऽपि जगच्चित्रं ते नमुह्यंति पूर्ववत्
॥२९०॥ ॥इति श्रीचित्रदीपः समाप्तः॥ ॥ ॥२॥ ॥छ॥ ॥

९०॥ ग्रंथाभ्यासफलमाह। चित्रदीपमिति॥२९०॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीती
र्थविद्यारण्यश्रीचरणशिष्येण रामकृष्णाख्यविदुषा विरचितेतात्पर्यबोधिनीनामकं चित्रदीपव्याख्या॥ ५६